त्वं गच्छ गृहमित्युक्तस्तरसा[५९] प्रतिबुध्य सः।
स्वप्रियां विप्रवर्यस्तं स्वप्नवृत्तान्तमब्रवीत्॥४८॥

ततस्तौ दम्पती मत्वा सफलं स्वात्मजन्म[६०] हि।
तौ भक्त्याऽभजतां[६१] शम्भुं प्रणम्य भवनं ययौ॥४९॥

सन्तर्प्य विप्रसंघातं वस्त्रभूषणकादिभिः[६२]।
आशीर्वचांसि तेषां तौ जगृह्णाते वधूवरौ॥५०॥

---

५२ बिभद्द्विजाकृतिम्। (C, D, F);
५३ त्वमिच्छसि। (B);
५४ प्रसन्नेन। (B); स्वपृष्टेन। (C, D); सुपृष्टेन (E);
५५ महादेवस्तं। (D);
५६ द्विजं। (B, C, D);
५७ गुणान्वितम्। (C);
५८ तं द्विजवेषो। (B, C, D, E, F);
५९ तं भक्त्यामितरक्तं च। (B);
६० तौ दम्पती तं च नत्वा सफलं स्वप्नदर्शनम्। (B); °स्वप्नदर्शनम्। (C, D, F);
६१ समाप्तभजनौ। (B, C, D, E, F);
६२ वस्त्रान्नकनकादिभिः। (B, C, D, E);

लब्धानुज्ञौ द्विजातीनां तेषां भुक्तवतां ततः।
तद्भुक्तशेषमन्नं[६३] तु भोक्तुकामौ बभूवतुः॥५१॥

तत्रान्ने भोक्ष्यमाणे तु प्राविशज्ज्योतिरैश्वरम्।
दम्पती तौ मुदोपेतौ बुभुजाते[६४] तदादृतौ॥५२॥

गर्भं दधार सा तूर्णं शङ्करांशेन राजितम्।
प्रवृद्धे तत्र चासूत नन्दनं समये शुभे॥५३॥

प्रादुर्भावे कुमारस्य लग्नमासीत्सुशोभनम्।
बलयुक्तशुभं ज्योतिः समारुढं[६५] समीक्ष्य तम्॥५४॥

येन सर्वज्ञतामेति जातवान् भुवि मानुषः।
न च पयोऽप्यभुक्तस्य[६६] द्विजपुत्रस्य संभवे॥५५॥

मृगेन्द्रगजसर्पाखुतरक्षुहरिणादयः।
हित्वाऽन्योन्यं तदा वैरं जन्तवो व्यहरन् वने॥५६॥

पुष्पाणि पुष्पवद्वृक्षा[६७] मुमुचुश्च[६८] तथा लताः।
सुप्रसन्नजला नद्यो निष्पङ्काः[६९] सिन्धवोऽभवन्॥५७॥

द्वैतवादिकराग्रेभ्यः पुस्तकानि[७०] तदाऽपतन्।
अद्वैतवादिनां चेतो हृष्टं व्यासस्य चाऽभवत्॥५८॥

स द्विजस्तनयं दृष्ट्वा मग्नोऽप्यानन्दसागरे।
स्नात्वा नदीजले प्रादाद्विप्रेभ्यो धनसंचयान्॥५९॥

यथावत्स महीदेव जातकर्म विधाय च।
भूयो दृष्ट्वाऽऽत्मजं हृष्टो यथेन्दुं[७१] कुमुदाकरः॥६०॥

---

६३ तौ। (B, C, D, E, F);
६४ भुञ्जातेऽन्नं। (F);
६५ समारूढस्वरोत्थितम्। (B); °समीक्षितम्। (D, E);
६६ सर्वयोगोऽप्यभूतस्य। (B, D, E);
६७ पुष्पिता वृक्षा। (A, B, C, D, E, F);
६८ श्च तदा। (C); ०चुर्बहुधा। (B);
६९ निर्मला अभवन् तदा। (B);
७० पुस्तकान्यपतन् भुवि। (F);



तारकान्तेन रुद्रांशेनारिसंरोधिशक्तिना।
पार्वतीव कुमारेण तुष्टा सा च द्विजाङ्गना॥६१॥

जन्मकालममुष्याऽथ ज्योतिःशास्त्रविशारदाः।
विचार्य सुतरां बुद्ध्या शशंसुर्द्विजपुङ्गवम्॥६२॥

सर्वज्ञो[७२] भविता नूनं तव पुत्रो महीसुर।
हितमद्वैतवादिभ्यः शास्त्ररत्नं विधास्यति॥६३॥

द्वित्रै[७३] र्बहुविधैर्वादैर्विजेता[७४] च सरस्वतीम्।
स्थापयिष्यति लोकेऽस्मिन् कीर्तिं च विमलां निजाम्॥६४॥

एवंविधान् समाकर्ण्य पुत्रजन्मगुणान् द्विजः।
विस्मितोऽतीव पूर्वस्माद्गिरिशे भक्तिमानभूत्[७५]॥६५॥

**॥ इति श्रीशङ्कराचार्यचरिते द्वितीयोऽध्यायः॥**

---

७१ यथेष्टं। (E);
७२ शास्त्रज्ञो। (E);
७३ चित्रैः। (B, C, D, E);
७४ विजित्वा। (B);
७५ °मान् भवेत्। (F);

## ॥ अथ तृतीयोऽध्यायः ॥

द्वादशेऽहनि तं बालमङ्कमारोप्य कौतुकात्।
चक्रे शङ्करनामानं पिता शङ्करभक्तितः[१]॥१॥

दैवज्ञवाणीं[२] संचिन्त्य तत्प्रज्ञामवलोक्य च।
आरब्धाक्षरमारम्भे तृतीयाब्दस्य तं व्यधात्॥२॥

एकवारं लिखित्वा स जग्राह लिपिसंचयम्।
नानाविधं समस्तं च शङ्करोऽतीव बुद्धिमान्॥३॥

काव्यानि चेतिहासांश्च[३] पुराणान्यखिलानि सः।
यथावज्जगृहे श्रीमान् प्रयाते वत्सरत्रये॥४॥

पञ्चमाब्दे निजं बालमुपनेतुमना[४] द्विजः।
पञ्चत्वमगमत्सद्यः कालो हि दुरतिक्रमः॥५॥

वल्लभे पञ्चतां याते शोकविक्लवमानसा।
भार्या बालसुता वृद्धा रुरोद करुणं[५] बहु॥६॥

क्रमेणाश्वासिता मित्रैः शोकमुत्सृज्य सा ततः।
संवत्सरान्ते दीक्षान्तं समाप्य विधिवत्पितुः॥७॥

सुतेन कारयामास संस्कारादिक्रियाः पितुः[६]।
पञ्चमाब्दे शुभे काले द्विजत्वं प्राप शङ्करः॥८॥

---

१ भक्तिमान्। (A, B, C, D, E, F);
२ °वाचं। (B);
३ इतिहासानि। (D, E, F);
४ पुत्र°। (D, E, F);
५ °बालसुतं दृष्ट्वा शुशोच करुणा सती। (B); करुणा सती। (D);
६ All the other mss. give the 2nd line of st.7 and the first line of st. 8 in the reverse order and this seems to be more natural & correct.



ततः स जगृहे साङ्गनिगमानखिलानपि[७]।
पदानि तेषामर्थांश्च कालेनाल्पेन बुद्धिमान्॥९॥

किं फलं बहुनोक्तेन षोडशाब्दे, समागते।
सर्वज्ञत्वमगादेव शङ्करः शङ्कराशुगः[८]॥१०॥

दूरयानाक्षमां दृष्ट्वा जरया जननीमसौ।
किंचिद्दूरगतो चूर्णां[९] निन्ये निजगृहान्तिके॥११॥

अम्बाहितार्थमानीता पुत्रेणात्मगृहान्तिकम्।
अम्बापगेति[१०] चाख्याता तस्यां ककुभि सा नदी॥१२॥

स्नानार्थमेकदा तस्मिन्नवतीर्णो[११] नदीजले।
अग्रहीत्तीक्ष्णदंष्ट्रस्तं ग्राहः पादे महाबलः॥१३॥

निजाक्रोशं समाकर्ण्य[१२] माता च द्रुतमागता[१३]।
सोऽब्रवीदम्ब[१४] मां नक्रो बलवानग्रहीत्पदे॥१४॥

संन्यासी भवितुं बुद्ध्या यदि निश्चिनुयामहम्।
मोक्ता मामयमह्नाय नात्र कार्या विचारणा॥१५॥

उक्ता[१५] सा निजपुत्रेण तस्य जीवितकाङ्क्षया।
साऽनुमेने च तत्तूर्णं संन्यस्तं[१६] चात्मनाऽमुना॥१६॥

ग्राहमुक्तो जलोत्तीर्णः सोऽब्रवीज्जननीं ततः।
मया जननि संन्यस्तं मनसा विधिवैभवात्॥१७॥

---

७ साङ्गान्नि°। (D, E, F);
८ °रांशजः। (C, E, F); शङ्करो द्विजः। (B);
९ पूर्णां। (A, B); चूर्णीं। (C, D, E F);
१० अम्बाहितेति। (B);
११ °तीर्णां। (C, D, E);
१२ पुत्रं क्रोशन्तमाकर्ण्य। (B);
१३ मातरं द्रुतमागताम्। (A, C, D, E); मातरं दूरमागताम्। (F);
१४ अब्रवीत्। (B);
१५ उक्तेति। (B, C, D, E, F);
१६ तं तूर्णं संन्यस्तुं.... मुदा। (C); तं.... तदा। (B); संन्यासं (F);

नैव[१७] निश्चित्य[१८] संन्यासं कुर्यात्कालविलम्बनम्।
ततोऽद्यैव गमिष्यामि त्वां विधाय सुहृज्जने॥१८॥

संस्मृतोऽहं त्वया मातरागमिष्यामि सत्वरम्।
मृतां च संस्करिष्यामि त्यक्तशोका[१९] वसान्तिके[२०]॥१९॥

इत्युक्त्वा स विनिक्षिप्य बन्धुलोके स्वमातरम्।
प्रणम्य तदनुज्ञात[२१] इयासुरभवद्द्रुतम्॥२०॥

सोऽपश्यत्पुरतस्तावत्किञ्चिदिन्दिवरत्विषम्।
महानुभावमूचे तं शङ्करं स महोनिधिः[२२]॥२१॥

अप्रमेयानुभाव त्वं वासुदेवं शिलामयम्।
वसन्तमिह साधूनां रक्षणार्थमवेहि माम्॥२२॥

त्वया मातृहितं कर्तुमानीताऽतिसमीपगा।
मद्धामोर्मिकरैरेषा[२३] ताडयत्यनिशं हृदि॥२३॥

प्रतिवर्षं[२४] महावेगैरन्तर्गृहमुपागतैः[२५]।
सलिलैश्चास्यमानोऽस्या आसन्नपतनोऽस्म्यहम्[२६]॥२४॥

प्रयाते भवति क्षिप्रं यास्याम्यहमपि ध्रुवम्।
तस्माद्विधाय मद्रक्षां[२७] याहि काङ्क्षितसिद्धये॥२५॥

---

१७ Between st. 17 & 18, B & F give the following stanza:
मनसा कृतसंन्यासो यदि कुर्याद्विलम्बनम् जीवश्राद्धादिकरणे पतितस्स्याम....॥
१८ निश्चितसंन्यासः। (A, B, C, D, E);
१९ मुक्त°। (C);
२० °लये। (A, C, D, E, F);
२१ °ज्ञातो यिया°। (B, C);
२२ महानिधिः। (C,) शङ्करं स महोनिधिम् (E, F);
२३ मध्यमार्गोर्मिभिर्विष्णुं (B); मायामूर्मिकरै°। (F);
२४ प्रतिक्षणं (B);
२५ °र्जल° (B);
२६ °पतितो°। (C);
२७ मन्मूर्तिं। (B);



इत्युक्तः म शिलारूपं दोर्भ्यामुद्धृत्य[२८] तं शनैः।
किञ्चिद्दूरे नदीतीरे नीत्वा चक्रे प्रतिष्ठितम्॥२६॥

तस्मादपि जनन्याश्च लब्ध्वाऽनुज्ञां ततोऽप्युभौ।
शङ्करोऽततीव निःसङ्गः संन्यासाय जगाम सः॥२७॥

श्रीशुकस्याऽभवच्छिष्यो गौडपाद इति श्रुतः।
तस्य शिष्यो महातेजा वर्तते यो द्विजो[२९] गृही॥२८॥

संन्यासविधितत्त्वज्ञं गोविन्दस्वामिनं स तु।
स्थितं काश्यामवापाऽशु[३०] वायुमार्गमुपाश्रितः॥२९॥

ततो[३१] विहितसंन्यासो यथावज्जगृहे[३२] ततः।
सर्वं यतिजनैर्ग्राह्यमुपदेशं महत्तरम्[३३]॥३०॥

तुरीयमाश्रमं गत्वा केवलात्मा[३४] जितेन्द्रियः।
गुरु शुश्रूषणेऽनैषीद्भूयिष्ठानि[३५] दिनानि सः॥३१॥

स जातु शङ्कराचार्यस्तीर्थयात्रासमुत्सुकः।
तदनुज्ञामयाचच्च[३६] निजं[३७] देशिकमादरात्॥३२॥

नानादेशान् दिदृक्षेऽहं[३८] बहुतीर्थसमन्वितान्।
देयाऽनुज्ञा गुरो मह्यं तदर्थं शिष्यवत्सल॥३३॥

---

२८ °मुत्कृत्य। (B);
२९ द्विजो हरिः (C); द्विजोत्तमः। (B, F);
३० काश्यामुपजगामाऽशु। (B, F); काश्यामवाप वेगेन (F);
३१ ततश्च कृतसंन्यासः। (F);
३२ °ऽञ्जसा। (B, F);
३३ महत्तमः। (F);
३४ निर्मलात्मा। (B, C, D, E, F);
३५ °श्रूषयाऽनै°। (A, B, C, D, E, F);
३६ °मयाचिष्ट (B, C, D, E, F);
३७ निजदे°। (F);
३८ तदनुज्ञा। (F);

उवाच गुरुभूपस्तमियासुं तीर्थवत्सलम्[३९]।
यतीनां ब्रह्मनिष्ठानां[४०] तीर्थयात्रा[४१] सुदुष्करा॥३४॥

निर्मनुष्या[४२] निरावासा निर्जला बहुकष्टकाः।
प्रदेशा बहवः सन्ति मार्गेषु सकलेषु[४३] च॥३५॥

यात्राविघ्नकरा[४४] मार्गे बहवो हि भवन्त्यपि।
रोगक्षुधापिपासाद्याश्चोरव्याघ्रादयस्तथा॥३६॥

क्षेत्रवासो[४५] गुरौ वासस्तीर्थं तच्चरणोदकम्।
स्थितिरत्रैव कार्या ते तन्नो देशान्तरे गतिः॥३७॥
शङ्करोऽथ गुरुं प्रोचे सत्यं हि भगवद्वचः।
तथापि मामकं चित्तं तीर्थस्नानसमुत्सुकम्॥३८॥

स दूरस्थोऽप्यदूरस्थो यद्धयो[४६] गुरुमात्मना।
सोऽन्तिकस्थोऽपि दूरस्थश्चिन्त्यते यो नमो गुरुः[४७]॥३९॥

दैवेऽनुकूले सर्वं च सुलभं च शरीरिणाम्।
दैवे तु प्रतिकूले स्यान्मन्ये सर्वं च दुर्लभम्॥४०॥

---

३९ °संञ्चयम्। (C, D, E); तमुवाच गुरुः शिष्यं तीर्थयात्रासमुत्सुकम् (B, F);
४० ज्ञान°। (F);
४१ यानं.... °रम्। (C, D, E); 'स्नानं...... रम्। (B); °ज्ञानं। (F);
४२ निर्मानुषा (F);
४३ मतिसत्तम। (B, F);
४४ यात्राविघ्नकरान्ये च चोरव्याघ्रादयस्तथा (F);
४५ In place of st. 37 & 38, 'C' gives: क्षेत्रवासो गुरौ वासस्तीर्थस्नानसमुत्सुकः। only for st.38; 'F' gives; इति श्रुत्वा गुरोवाक्यं यत्र श्रेष्ठं तमब्रवीत्। सत्यं हि भगवद्वाक्यं तथापि... मानसम्। तीर्थस्नाने समुद्युक्तं साम्प्रतं वर्तते गुरो।
४६ धत्ते यो (B, C, D, E, F);
४७ येन नो गुरुः। (C, D, E, F);



जीवत्यपि[४८] विदेशेषु चिरं[४९] तीर्थानि संचरन्।
द्राग्गृहस्थो[५०] मृतोऽपि स्यात्तस्मादैवं[५१] तु कारणम्॥४१॥

स्वदेशस्थेन मर्त्येन विदेशेषु स्थितेन वा।
समस्तमनु[५२]भोक्तव्यं विधात्रा[५३] विहितं ध्रुवम्॥४२॥

तद्देशगमनेनैव देवदत्तो मृतिं गतः।
इत्यादिवचनं सर्वमज्ञानजनितं नृणाम्॥४३॥

तीर्थवासे[५४] सुसत्सङ्गः सत्सङ्गे निर्मला स्मृतिः[५५]।
निर्मलायां मतौ ज्ञानं ज्ञाने मुक्तिश्च जायते[५६]॥४४॥

इत्थं चिन्तयतो मेऽस्य तीर्थस्नानरता मतिः।
तदनुज्ञां प्रार्थये[५७] त्वां गुरो मेऽर्हसि सत्वरम्॥४५॥

इति शिष्यवचः श्रुत्वा गुरुः प्रीतिसमाकुलः।
अनुज्ञामददात्क्षिप्रं तस्मै निर्मलचेतसे[५८]॥४६॥

---

४८ जीवन्नपि (B, C);
४९ चरन्.... संस्मरन्। (B);
५० ग्राहग्रस्तो। (C);
५१ नात्र कार्या विचारणा। नास्य दैवं न कारणम् (D, E);
५२ ०मापि तेनाप्यं (C);
५३ विधातृविहितं (D, E);
५४ तीर्थसेवासमुत्सङ्गः। (C); तीर्थसेवासु सत्सङ्गः। (F)
५५ मतिः। (B, C, D, E);
५६ 'C' does not give the 2nd half of st. 44 & this half of st. 45
५७ प्रदातुं तं। (B, C, D, E, F);
५८ निर्मुक्त°। (C); निर्मलतेजसे। (B);

तीर्थस्नानरतं चित्तं यद्यस्ति तव शङ्कर[५९]।
गन्तव्यमचिरेणैव त्वया सानुचरेण हि॥४७॥

चोरव्याघ्रादिसंकीर्णं मार्गं मुक्त्वा सुखं व्रज।
अध्वना सतरुच्छायातटाकद्विजवेश्मना॥४८॥

भिक्षाशनं तु मध्याह्ने कर्तव्यं द्विजसद्मसु।
देवालयेषु कार्या च निद्रा रात्रिषु शङ्कर[६०]॥४९॥

मार्गेषु नेक्षणीयास्ते नरा नगरवासिनः।
तद्देशो द्राक् समुल्लङ्घ्य[६१] कर्तव्या तत्र न स्थितिः॥५०॥

दृष्ट्वा चेत्कुत्रचिन्नारी तस्यां दारुमतिं[६२] कुरु।
दीर्घमार्गप्रयाणेषु भवेत्सर्वं च शङ्कर॥५१॥

हेमखण्डाभिपतितं[६३] मार्गे दृष्ट्वाऽमना[६४] भव।
लोष्टवद्दूरतस्त्यक्त्वा यायाः[६५] सुस्थिरमानसः॥५२॥

५९ After 'शङ्कर', 'C' gives the following before 'गन्तव्यमचिरेणैव' & C.
''गन्तव्यमचिरान्नो चेद्विश्वनाथं समर्चयन्।
षोडशैरुपचारैस्तं पिबंस्तच्चरणोदकम्॥
स्थितिरत्रैव कार्या ते तत्र देशान्तरे गतिः।
शङ्करोऽथ गुरुं प्रोचे सत्यं हि भगवद्वचः॥
तथापि मामके चित्तं तीर्थस्नानोत्सुकं सदा॥
The last three lines here are those that have been omitted in 'C' after चरणोदकम् in st.37 & the whole of st.38 in the present text.

६० 'F' reads; भिक्षाशनं तु कर्तव्यं द्विजवेश्मसु सुव्रत।
विधूमे स... खले इति वाक्यानुसारतः सन्ध्या मनेषु कर्तव्यं निद्रा रात्रिबु शङ्कर॥

६१ °च्छेद्यः। (B);

६२ मित्रमतिं। (F);

६३ हेमखण्डं निपतितं। (B, C, D, E)

६४ दृष्टमनाथवत्। (B, C, D, E, F);

६५ यियासुः स्थिर। (B, C);



प्रतिमां देवतानां च तत्र तत्र विलोकयन्।
समबुद्ध्याखिलानां[६६] तु मनसि त्वं धृतादरः॥५३॥

सततं सर्वमार्गेषु[६७] कर्तव्यः सत्समागमः।
तत्कथामृतपानेन विनेयोऽध्वश्रमो[६८] भृशम्॥५४॥

अन्वितः सर्वदा मार्गे सज्जनैरमलात्मभिः।
तीर्थयात्रां विधायैव द्रुतमायाहि शङ्कर॥५५॥

गुरोरिति मुखेन्दोस्तद्गलितं वचनामृतम्[६९]।
कर्णरन्ध्रेन पीत्वाऽन्तश्चक्रे स गुरुसन्नतिम्॥५६॥

उदीच्यां दिशि तीर्थानि पुण्यानि सकलानि सः।
सेवमानोऽथ सम्प्राप्तः पुण्यं बदरिकाश्रमम्॥५७॥

दिनानि तत्र सोऽवात्सीद्बहूनि धृतसन्मनाः[७०]।
नानाविद्वज्जनव्रातैः[७१] सेव्यमानो महाधनैः[७२]॥५८॥

वेदान्तसूत्रवेश्मान्तर्वर्तमानार्थदृष्टये[७३]।
तदा[७४] सूत्रेऽकरोत्प्राज्ञः श्रीमद्भाष्यप्रदीपिकाम्॥५९॥

सर्वदिग्व्याप्तभाष्यांशुः[७५] श्रीशङ्करदिवाकरः।
तिरोदधे[७६]ऽखिलं लोके भेद[७७]वादितमोगणम्॥६०॥

६६ °खिलान्नन्तुं। (C); °लाना त्वमर्हसेषुक्लृप्तादरः। (B); धृतादरम्। (D, E);
खिला नन्तु। (E); अर्हसि त्वं धृतादरम्। (E);

६७ सन्ततं सर्वतीर्थेषु सज्जनैः सह सङ्गमे (B, F);

६८ °ध्वपरिश्रमः(E);

६९ कण्ठरज्ज्वेव नीत्वान्त°। (A) आदरेण गृहीत्वाऽथ उवाच गुरुसंनिधौ (B);

७० °संमुदः। (B); °सम्मदः। (C, D, E);

७१ °द्विजजन° (C);

७२ महादरैः। (B, C, D, E); महामतिः। (F);

७३ वेदान्तशास्त्र °प्रतिपाद्यार्थ°। (B);

७४ तदानीं सोऽ° (B, C, D, E);

७५ तिरश्चक्रे। (B, C, D, E, F);

७६ °शिष्याप्त° (B);

७७ प्रतिवादि°। (B, C, D, E, F);

निजनिर्मितसूत्राणां श्रुत्वा भाष्यनिबन्धनम्।
तत्राऽजगाम सन्तुष्टः पराशरसुतो मुनिः॥६१॥

दृष्ट्वाऽन्योन्यं व्यतनुतां[७८] सपर्यामुचितामुभौ।
उवाच तदनु व्यासं शङ्करो हृष्टमानसः॥६२॥

रे मुने स्वागतं तेऽस्तु कृतार्थोऽस्मि तवेक्षणात्।
अद्य मामनुगृह्णासि व्यक्तं भक्तमिमं[७९] त्वयि॥६३॥

येन त्वया त्रयी व्यस्ता लोकानुग्रहकाङ्क्षया।
तदीयार्थप्रकाशार्थं[८०] भारतं च महत्कृतम्॥६४॥

संदृश्यतेऽखिलाम्नायमहार्थानि[८१] कृतानि च।
अष्टादशपुराणानि त्वया येन महामुने॥६५॥

लोकाननुजिघृक्षुस्त्वं लोके संचरसि ध्रुवम्।
पूर्णकामाः किमन्यस्थानभिवाञ्छन्ति[८२] पूरुषाः॥६६॥

तथाऽप्यागमने हेतुं तव पृच्छामि कौतुकात्।
काङ्क्षितेनापि[८३] केनापि भवान् साम्प्रतमागतः॥६७॥

उत्युक्तो यतिवर्येण शङ्करेण महात्मना।
प्रत्युवाचाऽतिहृष्टात्मा पाराशर्यो महामुनिः॥६८॥

वेदान्तागमसूत्राणां रचितानां मया यते।
त्वया भाष्यं व्यधायीति श्रुत्वाऽऽयातोऽस्मि साम्प्रतम्॥६९॥

---

७८ प्रवदतां सपाद्य°। (B);
७९ यत्तद् व्यक्तमिदं त्वया। (C); यत्तदुक्तमिदं। (B, D, E, F); यत्तद्युक्त°। (F);
८० त्वदी°। (B);
८१ संदर्शिता° (C, D, E, F);
८२ °स्मादन°। (C, D, E); °स्माद्वाञ्छन्ति हि भवादृशाः। (B); °मन्या वै भवादृशाः। (F);
८३ किमर्थमागतोऽसि त्वं वेदवेदांतपारगः (B, F); After this, B & F have the following stanza. तवागमनेन वयं हर्षेणाविष्टचेतसः। महार्कसंनिभो विद्वन् दिवसः प्रतिभाति मे। (B) तवागमन येनाहं... चेतसः। महोत्सवनिभो विद्वन् प्रेयसः.... मे॥ (F);



तद् द्रष्टुं कौतुकेनालं त्वरते मम मानसम्।
इत्युक्तो दर्शयामास स[८४] तस्मै भाष्यपुस्तकम्॥७०॥

अपूर्वं तत्समादाय शङ्करेण[८५] विनिर्मितम्।
यथावदखिलं वीक्ष्य वेदव्यासस्तमब्रवीत्॥७१॥

विवृताखिलसूत्रार्थं निर्दोषं[८६] सगुणान्वितम्।
हिताय सुतरामेव[८७] जायतेऽद्वैतवादिनाम्॥७२॥

अर्थामृतमुदारं[८८] सत्सूत्रदुग्धपयोनिधौ[८९]।
आविष्कृतमिदं[९०] भाष्यं त्वत्कृतं मन्दरायते॥७३॥

प्रमोदो मम जातोऽलमस्मद्भाष्यनिबन्धनात्।
तस्मादस्य प्रतिष्ठां त्वं शिष्या[९१]दिषु यते कुरु॥७४॥

उत्युक्त्वा यतिवर्याय पुस्तकं स प्रदाय[९२] तत्।
सन्तुष्य सुतरां व्यासस्तिरोधानं गतोऽभवत्॥७५॥

**॥ इति श्रीशङ्कराचार्यचरिते[९३] तृतीयोऽध्यायः॥**

---

८४ तस्मै तद्भा°। (B);
८५ यतिवर्यविनि°। (F);
८६ °सुगुणा°। (B, D, E); (सु)मनोहरम्। (F);
८७ °मेतज्ज्ञा°। (C); °मेतज्जा°। (B,F);
८८ °मृतं यतिश्रेष्ठ सू° (B);
८९ °निधेः। (C);
९० आविष्कर्तुं (C, E); आविर्भूत°। (B)
९१ शिष्यौघेषु। (B);
९२ तत्प्रदाय च (C); संप्रदाय। (A, B, C, D E);
९३ व्यासदर्शनं नाम। (B); श्रीमद्भाष्यरचनं नाम। (C);

## ॥ अथ चतुर्थोऽध्यायः ॥

शंङ्करोऽथ[१] महायोगी स्वमात्रा संस्मृतो[२] भृशम्।
आत्मजन्मगृहं प्राप्य वायुमार्गेण[३] सत्वरम्॥१॥

नत्वा स जननीं तत्र समासन्नमृतिं निजाम्।
शैवं च वैष्णवं रूपं पद्यैः कैश्चिदुपादिशत्॥२॥

संचिन्त्य मुरजिद्रूपं यथावदसुनिर्गमे[४]।
यतिगम्यं पदं[५] प्राप माता यतिवरस्य सा॥३॥

संस्कर्तुं जननीमिच्छन्[६] लब्धो[७] द्विजपावकः।
निधाय बहुकाष्ठानि कुण्डे शुष्काणि तानि सः॥४॥

जातेन मथिताद्बाहोर्दक्षिणाद्दक्षिणाग्निना[८]।
प्रदीप्य मातरं तत्र जुहावाच्छिद्य शङ्करः॥५॥

आस्तां तावदियं प्रसूतिसमये दुर्वारशूलव्यथा
नैरुच्ये तनुशोषणं मलमयी शय्या च सांवत्सरी।
एकस्याऽपि न गर्भभारभरणक्लेशस्य यस्याः क्षमो
दातुं निष्कृतिमुन्नतोऽपि तनयस्तस्यै जनन्यै नमः॥६॥

इमं मन्त्रं जपन् गुर्व्या मातृभक्त्या समन्वितः[९]।
कुण्डं प्रदक्षिणीकृत्य साष्टाङ्गं च ननाम सः॥७॥

---

१ ° यं। (C); अथ श्रीशङ्कराचार्यः। (F);
२ °संस्मृतस्ततः। (B, C, D, E, F);
३ वायुवेगेन। (F);
४ °दस्य नि°। (B);
५ सदं। (F);
६ °नीं तत्र। (B);
७ अलब्धद्विजपावकः। (C, D, E, F);
८ जातोऽग्निरचितात्तस्माद्बाहोर्दक्षिणपाणिना। (B);
९ समाहितः। (B);



यतीन्द्रोऽपि रुषा शापं त्रयीबाह्या भवन्त्विति।
तं दत्वा[१०] तत्र विप्रेभ्यः प्राप्तो बदरिकाश्रमम्॥८॥

अथाऽगमद्द्विजेन्द्रस्तं कश्चिद्भासा जितानलः।
अधीतवेदवेदाङ्गः[११] पारगो महिमालयः॥९॥

सर्ववाञ्छाविहीनात्मा भवसागरभीतिमान्।
आयातः स पदाम्भोजे ननाम शिरसा गुरोः॥१०॥

पतितं निजपादाब्जे तमुत्थाप्य जगाद सः।
कस्त्वं कथय[१२] विप्रेन्द्र कुत आगमनं तव॥११॥

उत्युक्तो द्विजवर्यस्तं बभाषे विनयान्वितः।
गुरो[१३] शृणु ममोदन्तं भूरिकारुण्यवारिधे॥१२॥

केरळेषु महत्क्षेत्रं कैलासाचलसंनिभम्।
श्रीकुण्डग्रामनामाऽस्ति[१४] कीर्तने[१५] पुण्यवर्धनम्॥१३॥

यत्र नित्यो[१६] महादेवः पार्वतीशो विराजते[१७]।
कुण्डस्थो जामदग्न्यश्च लोकानुग्रहतत्परः॥१४॥

क्षमादेवा क्षमायुक्ताः पञ्चयज्ञादितत्पराः[१८]।
भासुरा[१९] भूसुरश्रेष्ठा विद्यन्ते तत्र विश्रुताः॥१५॥

---

१० दत्वा तत्रत्यविप्रेभ्यः। (B, C, D, E, F);
११ अधीतवेदो वेदाङ्गपारगः। (C, D, E); °वेदवेदाङ्गपा° (B, F);
१२ क्व धाम। (A, C, E); स्वग्राम। (F); कस्त्वं त्वया नु... तत्रागमनकारणम्। (B);
१३ शृणुष्व मम वृत्तान्तं देशिकेन्द्र कृपानिधे। (F);
१४ श्रीकृष्ण°। (B); श्रीकण्ठ° (F);
१५ कीर्तनात्। (F);
१६ नित्यं। (A, B, C, D, E, F);
१७ °जति। (A, B, C, F);
१८ °यज्ञपरायणाः। (B, F);
१९ वेदाध्ययनशीलाश्च। (F);

तेषां[२०] विद्वत्तमः कश्चिद्द्विजवर्यो महागुणः।
अनपत्यश्चिरं गेहे न्यवात्सीद्दारसंयुतः[२१]॥१६॥

सोमशर्माभिधानोऽसौ नृसिंहवपुषं हरिम्।
तनयं लब्धुकामस्तं भेजे भक्तिसमन्वितः॥१७॥

तस्य विष्णोः प्रसादेन तत्पिता[२२] स द्विजोत्तमः।
मामयं[२३] तनयं लेभे नृसिंहांशसमन्वितम्॥१८॥

ततोऽहं विष्णुशर्माख्यः क्रमेण परिपोषितः।
अभवं पितुरादेशात्सर्वविद्याब्धिपारगः॥१९॥

षोडशाब्दे समायाते[२४] गुरूणामाज्ञया मम।
वर्णिभावे समाप्ते च दारिद्र्यविवशोऽभवम्॥२०॥

सोऽहं बहूनि वैश्यानां विहितानि यतीश्वर।
क्रयविक्रयकर्माणि[२५] कुर्वन् समचरं त्विमम्[२६]॥२१॥

अथादौ[२७] चिन्त्यशोकेन व्यपेतो न्यवसं[२८] गृहम्।
अभूवं[२९] गन्तुकामोऽहं जातु देशान्तरं गुरो॥२२॥

गजैरुष्ट्रैरश्ववरैर्वृषैश्च[३०] बहुभिर्वृतः।
नानादेशान् समुल्लङ्घ्य[३१] गतोऽहं विजनं[३२] वनम्॥२३॥

२० तेषु। (F);
२१ °संवृतः। (B);
२२ मत्पिता। (E); मत्पिता सद्द्विजोत्तमः। (B, C, D, F);
२३ मामियं। (B, C, D, E);
२४ समाप्ते तु। (B);
२५ आय°। (F);
२६ चिरम्। (B, C, D, E);
२७ अथ दौर्गत्यशो°। (C, D, E); अथ नैर्धन्यकेनाहं। (B);
२८ निवसन् गृहे। (C);
२९ भवन्तं। (B);
३० °रुष्ट्रैः खरैरश्वैः। (C); °रश्वैः खरैरुष्ट्रैः। (B, C, D, F);
३१ समालक्ष्य। (C);
३२ निर्जनं। (A, B, D, E);



सिंहव्याघ्रवराहाद्यैश्चौरैरपि निषेवितम्।
महारण्यं[३३] मयि प्राप्ते भानुमानस्तमागमत्॥२४॥

स्नात्वा वननदीतोये तस्मिन् परिजनो मम।
भुक्त्वा पीत्वा यथेष्टं च निद्रामाप श्रमान्वितः॥२५॥

द्रुमादिषु गजाश्वादीनाबध्य सुतरां दृढम्।
पीतकेवलपानीयो भयेनाकृतभोजनः॥२६॥

अद्य[३४] कां विपदं यास्याम्यहमित्यनुचिन्तयन्।
रात्रौ जागरणं कुर्वन्[३५] न्यवसं तत्र कानने॥२७॥

तदानीं मेघनिर्घातसदृशस्वननिःस्वनाः[३६]।
सिंहव्याघ्रादिजन्तूनां श्रूयंते[३७] स्म समीपतः[३८]॥२८॥

तथा[३९] गजतुरङ्गाद्याः पाशान् भित्त्वा[४०] बलेन ते।
दुर्निवारजवा[४१] भीत्या दुद्रुवुः ककुभो दश॥२९॥

दधानोऽध्वपरिश्रान्तिमाहूतोऽपि[४२] पुनःपुनः।
स्मरन्[४३] स्वजनसंस्थातः प्रबोधं नाप[४४] किंचन॥३०॥

संचरन्तो निशामध्ये छन्नवेषा धृतायुधाः[४५]।
कृतान्तसदृशाश्चोरास्तत्रायाताः स्म[४६] ते वने॥३१॥

३३ °ण्यमधिप्राप्ते। (B, F);
३४ अथ। (C);
३५ र्वन्न°। (B, D, E);
३६ °शास्तत्र नि°। (C, D, E, F); °शं तत्र। (B);
३७ श्रुतस्तत्र। (B);
३८ समन्ततः। (A, B, C, D, E); St. 28 - 2nd half is not given in 'F'
३९ तदा (C, D, E, F);
४० छित्त्वा। (A, B, C);
४१ दुनिर्वाराश्च नागिन्यां। (F);
४२ °मा भूयोऽहं (B);
४३ स्वपन्.. संघातः। (C, D, E); स्वपन्... तं। (B);
४४ नावपद्यत। (F);
४५ °तास्तदा। (B, C, D, E,);
४६ ०श्च (B);

खरोष्ट्रकादिनीतास्ते[४७] मदीयधनसंचयाः।
हसन्ति[४८] स्म ततः सर्वैश्चोरसंघैर्बलान्वितैः[४९]॥३२॥

शृण्वन्नन्योन्यवचनं[५०] चोराणां धनहारिणाम्।
कथंचित्तत्र नीत्वा तां क्षणदामतिदारुणाम्[५१]॥३३॥

ईषद्रक्तरुचौ प्राच्यां[५२] बध्नसारथितेजसा।
अपश्यं[५३] दिक्षु सर्वासु विषादविवशो भृशम्॥३४॥

अद्राक्षं तत्र किंचिन्न स्वपतः स्वजनादृते।
अचिन्तयं[५४] तदा सोऽहं दैवध्वस्तमनोरथः॥३५॥

अनतिक्रमणीया स्यादहो कालगतिर्नृणाम्।
ईदृशं विविधं तत्र वृत्तं[५५] विधिनिदर्शनम्[५६]॥३६॥

अनपत्यश्चिरं पूर्वं मत्पिता मां कथंचन।
लब्धवान्नरसिंहस्य प्रसादेन महीयसा॥३७॥

बाल्यात्प्रभृति सोऽहं तु दारिद्र्येणं प्रपीडितः।
ततोऽभवमयत्नेन[५७] गुरुणा धनवानहम्॥३८॥

---

४७ °कादयो नी°। (C); °दीनि चान्ते (B);
४८ हसन्तस्तु। (A); न्हीयन्ते... सर्वे चो°। (B, C, D, E);
४९ 'F' does not give st.32. But after this stanza & st.33, 'B' & 'F' give the following two stanzas:
पुनः पुनः समाहूता नोत्थिता सेवका जनाः।
तेनातीव परिश्रान्तो वनमध्ये यतीश्वर।
तदा गजादीनादाय चोरा यान्ति स्म सत्वरम्।
इत्थं बहुविधं दुःखमनुभूय महावने॥
५० श्रुत्वा चा°। (B);
५१ °दां मम। (C);
५२ °मर्कसा°। (C, F);
५३ 'B' does not give this line;
५४ 'B' does not give this line.
५५ मदुक्तं हि निद°। (C); मद्भुतं हि निद°। (D, E)
५६ 'B' does not give this stanza & 'F' does not give the second line;
५७ ऽभूवं प्रयत्नेन (C, D); प्रयुक्तेन। (B); ततो भूयः। (E);



पितरौ च पितृव्यांश्च सुहृदश्चाखिलानपि।
धनैर्बहुविधैरिष्टैर्भूयोऽहं समतोषयम्॥३९॥

ततोऽहं धनवत्त्वेन सेव्यमानोऽखिलैर्जनैः।
॥बहुभृत्यसमेतश्च सुचिरं न्यवसं[५८] गृहे॥४०॥

इदानीमीदृशीं काष्ठां[५९] नीतोऽहं विधिना पुनः[६०]।
दैवाधीनमिदं तस्माच्चराचरमिदं जगत्॥४१॥

संसृतिप्राणिनामेव दैवाधीनं विशेषतः[६१]।
सूत्रग्राहिनराधीना यथा वै शालभञ्जिका॥४२॥

देवानामपि सेवार्थं[६२] ध्रुवं जन्म यतो हरेः।
राघवाद्यवतारोऽपि बहुक्लेशयुतोऽभवत्॥४३॥

तस्माज्जन्मविनाशाय यत्नः कार्यो हि[६३] मानुषैः।
इत्येवं चिन्तयित्वाऽहमाचार्यं समुपागतः॥४४॥

गुरो युष्मत्कृपानावमधिरुह्य भवार्णवम्।
तितीर्षुरस्म्यहं नानाव्यसनोर्मिसुदुष्करम्[६४]॥४५॥

इत्थं कथितवृत्तान्तो द्विजवर्येण शङ्करः।
यथोक्तं चक्षुषा दिव्येनाऽपश्यत्सर्वमञ्जसा॥४६॥

ततः संन्यासविधिना चक्रे तं यतिनं[६५] निजम्।
ग्राह्यं चोपदिदेशाऽसौ समस्तं यतिसत्तमः॥४७॥

---

५८ ह्यवसं (B);
५९ कष्टां। (B, C, D, E);
६० दशाम् (B, C, D, E);
६१ संहतिः प्राणिनामेषा दैवाधीना हि चेष्टते। (B, C);
६२ सन्नर्थं। (C); सानर्थं। (D, E);
६३ मयाऽधुना। (B);
६४ 'सुदुस्तरम्। (B, C, E);
६५ यमिनं द्विजम् (C); (यतिनं) द्विजम् (B, D, E);

तत्र तीर्थे दत्वा सनन्दनाभिख्यां तस्मै देशिकपुङ्गवः।
शरद्यधिकदीप्येन[६६] [६७] भानुना भानुमानिव॥४८॥

**॥ इति श्रीशङ्कराचार्यचरिते[६८] चतुर्थोऽध्यायः॥**

६६ Between the two lines of this stanza, A, B, C, D, E have the following उपादिशच्च वेदान्तं भाष्यं च निजनिर्मितम्। (स्वेन निमिर्तम्) (C);
तेन प्रथमशिष्येण रराज यतिपुङ्गवः॥

६७ दीप्तेन। (B, C, D, E);

६८ मातृगति - पूर्वकं सनन्दनशिष्यस्वीकरणं नाम। (C);

## ॥ अथ पञ्चमोऽध्यायः ॥

ततो निषेव्य तीर्थानि भुवि[१] शिष्यसमन्वितः।
सम्प्राप देशिकेन्द्रस्तत्प्रधानं तीर्थमद्भुतम्[२]॥१॥

तत्र तीर्थे मनुष्याणां सुसंस्कृत[३]फलप्रदे।
संस्मृत्य जननीमुक्तिं सस्नौ शिष्यान्वितो गुरुः॥२॥

यथावद्विहित - स्नानस्तीरे तस्याथ पावने।
भट्टाचार्यं ददर्शासौ सुस्थितं तुषपावके॥३॥

परीतः[४] शिष्यवर्गेण ज्वलिताग्निसमद्युतिम्।
सशिष्यं शङ्कराचार्यं कुमारश्च ददर्श सः[५]॥४॥

भट्टाचार्यो निजैः शिष्यैस्तस्यार्चनमचीकरत्।
यतीन्द्रश्च ततः सोऽपि मोदमानस्तदाददे॥५॥

कृतभिक्षाशनस्तस्मै गुरुर्भाष्यमदर्शयत्।
शिष्यदृष्टः प्रबोधो हि लोके चरति सन्नपि॥६॥

भाष्यमालोक्य हृष्टात्मा भट्टाचार्यो यतीश्वरम्।
निर्मत्सरो गुणग्राही निजगाद महामतिः॥७॥

दर्शनं दुर्लभं नृणां यतीश्वर भवादृशाम्।
शंसमासीच्छरीरान्ते[६] समये च विशेषतः॥८॥

१ गुरुः। (B);

२ °मुत्तमम्। (B, C, D, E);

३ स्वसंस्मृत°। (C, D); स्मृतिमात्र°। (B); संस्मृतस्य फ°। (E);

४ परीतं। (B, C);

५ In place of st.4 (2nd line), st.5 & st. 6, 'B' has:
भट्टाचार्योऽपि तं दृष्ट्वा सशिष्यं यतिसत्तमम्॥४॥
पूजयामास विधिवद्भट्टः शिष्यसमन्वितः।
भिक्षां कृत्वा यतिश्रेष्ठो भट्टाचार्याय धीमते॥५॥
दर्शयामास सुप्रीतः श्रीमद्भाष्यं महामतिः॥

६ समासन्न°। (C, D, E); सन्यासं च। (B);

पुण्यैः पुरातनैरेव दृष्टोऽसि भगवन्मया।
नृणां संसृतिमोक्षाय त्वादृशैः संगतिर्भवेत्॥९॥

चिरं दिदृक्षुरेवास्मि भगवन्तं[७] महामते[८]।
भगवानागतो[९] दैवात्तन्मे दृष्टं[१०] महामते॥१०॥

यत्र संसारमार्गे तु नराणामिष्टसंगतिः[११]।
असंगतिरनिष्टानां कालाधीने हि ते उभे[१२]॥११॥

अस्मिन्नष्टौ सहस्राणि वार्तिकानां यतीश्वर।
विभान्ति प्रथमे भाष्ये तत्कृत्यै नालमस्म्यहम्॥१२॥

नाहमद्य मुमूर्षुश्चेत्करिष्याम्यद्य[१३] वार्तिकम्।
दुर्दृश्यायां[१४] मुमूर्षाया हेतुं शृणु यतीश्वर॥१३॥

वेदमार्गे पुरा तेन सुगतेन[१५] सुबाधिते।
तन्त्राणां[१६] कर्तृकामेन भृशं यत्नः कृतो मया॥१४॥

वादेनाहमशक्तस्तु[१७] विजेतुं तस्य शिष्यताम्।
गत्वा तच्छास्त्रतत्त्वज्ञस्तन्निरासोत्सुकोऽभवम्[१८]॥१५॥

७ भगवस्त्वं। (C);
८ महायतिम्। (B); महायते। (D, E);
९ वन्ना°। (C);
१० दृष्टेर्महायते। (C, D, E); द्रष्टुं। (B); महायते। (A,);
११ इष्टगा गतिः। (C);
१२ 'C' does not give the 2nd half of st.11 & 1st half of st.12;
Between st. 11 & st. 12, B gives :
कर्मकाण्डे रतिर्मेऽस्ति पूर्वमेव महामते।
इदानीं भगवद्भाष्यं श्रुत्वा ब्रह्मण्यवस्थिता।
इति जाता शरीरान्ते विशेषेण सुदुर्लभा॥
१३ °म्यस्य। (B, D, E);
१४ ईदृश्या मे। (B, C, D, E);
१५ सौगतेन च बाधिते। (B);
१६ तत्त्राणं (B, C, D, E);
१७ सौगतस्य मतं सम्यक् ज्ञात्वा तस्य निराकृतिः।
१८ कर्तव्येति तु निश्चित्य तस्य शिष्योऽ-भवं ततः। (B, C,)



एकदा वैदिकं मार्गं तथा सुगतदूषितम्[१९]।
शृण्वतो मम नेत्राभ्यां शोकेनाश्रुकणोऽपतत्[२०]॥१६॥

तदाप्रभृति तच्छिष्याः स्वाप्तेऽपि[२१] मयि शङ्किताः।
अस्मच्छास्त्रनिरासेन[२२] द्विजातिरिति निश्चिताः॥१७॥

प्राणिहिंसापरास्ते[२३] तु नगाग्रान्मामपातयत्।
यदि प्रमाणं[२४] वेदः स्याज्जीवेयमिति सोऽब्रुवम्॥१८॥

प्रयोगाद्यदिशब्दस्य तस्य संदेहवाचिनः।
शाक्यश्रवणतो व्यालाद्विनष्टं पततोऽक्षि मे॥१९॥

ततो निरस्तवानस्मि बौद्धशास्त्रमतं[२५] भृशम्।
यथामार्गं यथावत्तं प्रकाशं नीतवानहम्[२६]॥२०॥

एवं विक्रयितं[२७] कृत्वा वर्तमानस्य मे मुदा।
ईदृशी मतिरुत्पन्ना[२८] निश्चिता यतिपुङ्गव॥२१॥

एकाक्षरोपदेष्टाऽपि गुरुभूतो न संशयः।
उपदेष्टा तु शास्त्रस्य किं पुनः कथ्यते जनः[२९]॥२२॥

अहं सर्वज्ञतोऽधीत्य[३०] शास्त्रं तस्य निरासकः[३१]।
अभूवं[३२] यत्ततो दोषः प्रभूतो मयि विद्यते॥२३॥

१९ तदा सुगतबाधितम्। (C); तथागतसुदू°। (D, E);
२० शोकाद् (C);° म्बुकणो। (B);
२१ मयि शङ्कितमानसाः। (B, C); स्वप्नेऽपि। (E);
२२ °विरोध्येष। (C); निरास्येष। (B, D, E);
२३ °परा(स)तुङ्गात्सौधाग्रात्। (C, F);
२४ यदि वेदाः प्रमाणं स्युः। (B); यदि वेदः प्रमाणं स्यात्। (E, F)
२५ बौद्धशास्त्रं तु युक्तिभिः। (E); बौद्धशास्त्रस्य यु°। (C, F);
२६ वेदमार्गं यथावत्तं। (B, D); वेदमार्गं यथा वक्तुं.... नपि। (C);
२७ लोकहितं। (B, C);
२८ बुद्धि°। (A to F);
२९ जिनः। (B, D, E);
३० °तु सर्वतो°। (C);
३१ जिनाच्छास्त्रमधीत्यैव तन्मतं यन्निरस्तवान्। (F);
३२ तेन दोषेण लिप्येऽहमिति निश्चितवान् पुनः। (C); तेन्.... निश्चित्य वै पुनः। (F);

इत्थं चिन्तितवानेवं[३३] तद्दोषपरिशान्तये।
अहं स्थितो भवाम्यद्य मुमूर्षुस्तुषपावके॥२४॥

कंचित्कालमतीत्याऽस्मि[३४] नागमिष्ये यदि ध्रुवम्।
आलोको न[३५] भविष्यन्नौ सर्वा हि विधिकल्पना[३६]॥२५॥

विश्वरूपाभिधानोऽस्ति मच्छिष्यो मगधोषितः।
महाग्रही[३७] महाबुद्धिर्वैदिकाध्वविशारदः॥

स तु केनाप्युपायेन नीतो मस्करितां महान्[३८]।
विधास्यति महाभाष्यवार्तिकं[३९] यतिपुङ्गव॥२७॥

उक्त्वा[४०] तु विरते तस्मिन्महाचार्ये मुमूर्षया।
स ययौ सह शिष्येण विश्वरूपगृहं प्रति॥२८॥

विधातुरंशभूतस्य विश्वरूपस्य तस्य सा।
बभूव गृहिणी वाणी शिष्य तत्कारणं शृणु॥२९॥

निगमाध्ययने पूर्वं दुर्वासा धातुरन्तिके।
स्वरैः[४१] स्खलन् तदा वाणीं विहसन्तीं शशाप सः॥३०॥

मानुषी त्वं भवत्याशु शापं[४२] तस्यै मुनिर्ददौ।
दर्शने शापमोक्षं च मर्त्यमूर्तेरुमापतेः॥३१॥

अथ सा भारती जज्ञे शोणातीरे द्विजन्मनः।
तनया विष्णुमित्रस्य सर्वाङ्गमधुरा सती॥३२॥

---

३३ °नस्मि। (B, C); °नद्य। (F)
३४ किञ्चित्काल° स्मिन्ना°। (B, D, E); °मतोत्य°ष्यतिं चेद्।
३५ नाभ°। (B, E); नो भ°। (D);
३६ 'C' gives the 2nd line thus: (C);
(ईदृश्या मे मुमूर्षोश्चेद्वेदमार्गे पुरातने।)
३७ स तु बुद्धिमतां श्रेष्ठो धर्मशास्त्र°(B)
३८ ध्रुवम्। (B, C, F)
३९ महागृही भवद्भाष्य°। (D, E, F)
४० उक्त्वेति। (B, C, E);
४१ स्वरेऽस्खलत्। (B, C, D, E);
४२ शप्त्वा। (B, C, D, E, F);



शङ्खकुन्देन्दुनीहारस्फटिक[४३]क्षीरसाभया।
शरीरयष्ट्या राजन्ती सर्वलोकमनोहरा॥३३॥

अचिरेण[४४] तदा वाचं वर्णालिमग्रहीद्द्रुतम्[४५]।
समस्तवाङ्मयं[४६] चाशु सा बाला जगृहे च यत्॥३४॥

तत्सर्वं नाद्भुतं तस्यां यत्प्रसादलवं नराः।
लब्ध्वा भवन्ति सर्वज्ञा मानुषत्वे[४७] न वर्ण्यते॥३५॥

मूको भवति सर्वज्ञो यत्पादाम्बुजसेवनात्।
यत्पादभक्तिहीनो यात्यग्रजन्मा विमूकताम्[४८]॥३६॥

योगिभिर्मनसा ध्येया यस्या वर्णमयी तनुः।
या सुरासुरमौल्याभशोणिताङ्घ्रिसरोरुहा[४९]॥३७॥

कर्पूरामलविद्योतकरेणैकेन[५०] पुस्तकम्।
रम्यं जपवरं चैकेन बिभ्राणा विभाति या[५१]॥३८॥

बोधात्मिकाऽत्मभक्तानां हृदयाम्बुजनर्तकी।
वरदाभयदात्री च याऽखिलागमरूपिणी॥३९॥

सा वाणी बाल्यमायाता पितृभ्यां परिलालिता।
क्रमेण ववृधे चान्द्री कलेव सितपक्षगा॥४०॥

---

४३ °हारक्षीरसमाभया। (C, D, E, F); °हीरहारसमन्विता (B);
४४ अचिरेणाददे। (B, C, D, E, F);
४५ वर्णादीनग्रहीन्मुदा। (B); वर्णालीमग्रहीद्द्रुतम्। (D, E);
४६ समस्तं वाङ्मयं। (B, D, E); वाञ्छयत्याशु। (C)
४७ मानुषीत्वेन। (B, C, D, E);
४८ 'C' does not have the second half of this stanza.
४९ या सुरासुरौल्याभा शोभिता ससरोरुहा। (C); शोभिताङ्घ्रि°। (B, D, E); 'F' does not give this stanza;
५० विद्योता क°। (B); °त कनकस्त्रग्विराजिता। (C);
५१ 'C' does not give the second half of this stanza; रम्यं जपपरं °नाबि।° (A, D, E)

विवाहोचितकाले तामुपयेमे यथाविधि।
विश्वरूपो महाविप्रः[५२] सर्वज्ञः[५३] सर्ववित्तमः॥४१॥

तथा पत्न्या सहाऽवात्सीत्सुचिरं[५४] भवने सुखम्[५५]।
निरतो वैदिके मार्गे विश्वरूपो महाद्विजः[५६]॥४२॥

प्रतीक्ष्यातिथिवेलायां तिष्ठन्तमतिथिं[५७] गृहे।
अतिथेयिनमाचार्यः[५८] सम्प्राप्तो[५९] द्विजपुङ्गवम्॥४३॥

स्वशरीरप्रभाजालैः प्रकाशितदिगन्तरम्।
सोऽन्तर्नीत्वा यतिश्रेष्ठं पूजयामास सादरम्॥४४॥

---

५२ महाप्राज्ञः। (B, F);
५३ सर्वज्ञां। (B, C, D, E, F);
५४ सहैवात्सी°। (F);
५५ सुखी। (F);
५६ In place of the second half of this stanza, 'B' & 'F' give the follwong lines :
एवं स्थितेऽथ काले तु विश्वरूपगृहं प्रति।
समायातो यतिश्रेष्ठः सशिष्यः सर्ववित्तमः॥
५७ °मतिथीन्। (B, C, D, E); °थीन् गृही। (B);
५८ आतिथेयं तमाचार्यः। (B, C, D, E);
५९ सम्प्राप। (B, C, D, E);



अभोजयत पात्रे तदन्नं कृत्वा कराम्बुजे[६०]।
तोय दत्वा च सर्वज्ञस्तस्थौ[६१] मुदितमानसः[६२]॥४५॥

ततः करगतं तोयमाचार्यो नापिबद्द्रुतम्।
बभाषे च तदा[६३] पृष्टो द्विजेनाऽकुलचेतसा॥४६॥

भोजनानन्तरं मह्यं वाददाता भवान्यदि।
पिबामि तोयमन्नं च भुञ्जेयं[६४] विप्रसत्तम॥४७॥

अथाऽब्रवीद्द्विजश्रेष्ठो यतिश्रेष्ठं महामतिः।
अहं वादं करिष्यामि सन्देहो[६५] नात्र मे यते॥४८॥

केवलं कणशोषाय वादो नैवावयोर्द्वयोः।
कोऽत्र साक्षी भवेद्वादे वीक्षितुं[६६] विजयाजयौ[६७]॥४९॥

पराजितेन किं भूयः कर्तव्यं च यतीश्वर।
इत्युक्त्वा[६८] सजलं[६९] पीत्वा भिक्षाशनमथाऽकरोत्॥५०॥

---

६० तद्भार्याऽशनपात्रेऽन्नं कृत्वा यतिकराम्बुजे। (B, C, D, E);
६१ सर्वज्ञा.... ०मानसा। (B, C, D, E);
६२ In place of stt. 43 to 45, 'F' gives the follwoing:
विरिञ्च्यांशो विश्वरूपो दृष्ट्वा तं यतिपुंगवम्।
आसन.... रमं दत्वा ननाम शिरसा भुवि॥
सोऽन्तर्नीत्वा यतिश्रेष्ठं सशिष्यं भक्तिपूर्वकम्।
तत्पादपद्मं प्रक्षाल्य तज्जलं लोकपावनम्॥
शिरसा धारयामास सभार्यो द्विजसत्तमः।
ततः स विश्वरूपाख्यो यतिवर्यपुरो भुवि॥
अन्नमादाय विधिवत्सघृतं से..... दंशकम्।
यतिहस्ते जलं दत्वां भैक्षं दत्वा पुनर्जलम्॥
दत्वा जुबष्वमित्युक्त्वा तूष्णीमासीत्कृताञ्जलिः
६३ मुदाविष्टो। (F);
६४ भुञ्जेऽहं। (C, D, E, F);
६५ न सन्देहो महामते। (F);
६६ विज्ञातुं। (B, C); विज्ञातुं हि जया°। (D, E);
६७ St-49 &b first half of st.50 not given in 'F';
६८ °क्त (A, B, C, D, E, F);
६९ सलिलं। (F);

गृहीतानुमतिस्तस्मात्ततो भुक्तो[७०] द्विजोत्तमः।
बुभुजे तस्य भार्या च लब्ध्वाऽनुज्ञां[७१] निजप्रियात्॥५१॥

कृतप्रतिज्ञे तत्रेति प्रतिज्ञातं द्विजन्मना।
भिक्षुभावं गमिष्यामि यद्यहं तु पराजितः॥५३॥

ज्ञातुं जयाजयौ सूक्ष्मौ विदग्धा सत्यवादिनी।
वादे नौ तत्र[७२] साक्षित्वे तिष्ठत्वेषा वधूर्मम॥५४॥

इति तौ यतिविप्रेन्द्रौ सम्यग्विहितसंगरौ[७३]।
वाणीं कृत्वा तु साक्षित्वे चक्रतुर्वादमद्भुतम्॥५५॥

श्रोतुकामास्तयोर्वादं ब्रह्माद्या[७४] निखिलाः सुराः।
समारूढविमानास्ते नभोमार्गमुपागताः॥५६॥

म्लानिर्यस्य यदा यस्य[७५] तदा तस्य पराजयः।
वाणीति तद्गले मालां बद्ध्वा[७६] च वादकर्मणे॥५७॥

(स्व)स्वेदकम्पचिन्तारुट् तयोरेका न वागभूत्।
न काचित्कालहानिश्च दिनकृत्यकृतिं[७७] विना[७८]॥५८॥

सस्मितानन-वक्त्राभ्यां[७९] प्रगल्भाभ्यां प्रतिक्षणम्।
ताभ्यामुत्तरमन्योन्यमश्रमेणैव वर्तितम्[८०]॥५९॥

इत्थं विदधतोर्वादं तयोः शङ्करविप्रयोः।
दिनषट्कमतिक्रान्तं परस्परजयैषिणोः॥६०॥

---

७० भुङ्क्ते। (B, C, D); ऽभुङ्क्त (E)
७१ लब्धानुज्ञः। (C, D, E);
७२ वादेन कुत्र। (F);
७३ वादे विहित°। (C); सम्यप्संगतौ। (E); विद्वज्जनसभां गतौ। (B, F);
७४ इन्द्राद्याः। (B);
७५ ग्लानिरस्या यदा च स्यात्। (C); यदा यस्य। (B, D);
७६ बद्धवाऽगाद्गृह - कर्मणे। (B, C, D, E);
७७ कृतां। (B, D, E);
७८ Stt. 57 & 58 are not given in 'F';
७९ °पाप्पभ्यां। (C); °पद्माभ्यां। (B,D,E);
८० खण्डितम्। (B, C, D, E);



भोक्तव्यमद्य[८१] भिक्षान्नं युवयोरुभयोरपि।
सप्तमेऽहनि[८२] वाण्युक्ता शापमुक्ता[८३] तिरोऽभवत्॥६१॥

सत्यवादी स विप्रेन्द्रः पपात यतिपादयोः।
म्लानस्रग्-गृहवित्ताद्यं तदासर्वमिदं[८४] ब्रुवन्॥६२॥

विश्वरूपं ततो नीत्वा भिक्षुतां देशिकोत्तमः।
स्वमनोरथलाभेन सन्तुष्टः सुतरामभूत्॥६३॥

**॥ इति श्रीशङ्कराचार्यचरिते पञ्चमोऽध्यायः ॥**

---

८१ 'B,' & 'F' do not give this half of the stanza.
८२ From सप्तमेऽहनि, 'B' & 'F' read as follows:
सप्तमेऽहनि विप्रेन्द्रो मस्करीन्द्रेण धीमता।
पराजितस्तदा वाणी भाविकर्मेति निश्चिता॥
भर्तुरग्रे विधायाशु दण्डादीन् सा मनस्विनी।
मुनिशापविनिर्मुक्ता तिरोभावं जगाम सा॥
सत्यवादी स विप्रेन्द्रः पपात यतिपादयोः।
अनुक्तपूर्वमनृतं मया मस्करिपुङ्गव॥
इत्युक्त्वा वस्त्रदण्डादीनादाय स्वीकृताश्रमः।
पुनर्गुरुमुखाच्छ्रुत्वा श्रोतव्यं स यतीश्वरम्॥
तत्रैव ब्यवसत्सोऽपि गुरुशुश्रूषणे रतः।
विश्वरूपं विरिञ्चांशं लब्ध्वा शिष्यं यतीश्वरः॥
स्वमनोरथलाभेन.... मभूत॥
८३ शापं मुक्त्वा। (C);
८४ तव सर्वमिति। (B, D, E);

## ।। अथ षष्ठोऽध्यायः ।।

आचार्यस्य द्वितीयोऽयं शिष्यः संन्यासिनां[१] मतः।
सुरेश्वर इति ख्यातो बभूव भुवनत्रये[२]।।१।।

नैष्कर्म्यसिद्धिनामानं वेदान्तप्रतिपादकम्।
अकरोद्ग्रन्थमेकं च वार्तिकद्वितयं च सः[३]।।२।।

श्रीमद्भाष्यस्य टीकाख्यं व्याख्यानममितद्युतिः।
श्रीमत्सनन्दनाचार्यश्चकार मतिसत्तमः[४]।।३।।

कृतानि देशिकेनैव[५] भाष्याणि दश पंच च।
तेषामुपनिषद्भाष्यदशकं स्यादनुत्तमम्[६]।।४।।

हस्तामलकसंज्ञोऽभूत्ततः शिष्यो महान् गुरोः।
तत्प्रकारं प्रवक्ष्यामि शिष्य त्वं शृणु सादरम्।।५।।

गोकर्णं गन्तुकामः[७] सन्नेकदा देशिकेश्वरः[८]।
मार्गे शिवविहाराख्यं ग्रामं प्रापदनुत्तमम्।।६।।

१ संन्यासनामतः। (A, B, C, D, E, F);
२ मतिसत्तमः (F);
३ This stanza is not given in (F);
४ ब्रह्मवित्तमः। (F);
५ देशिकेन्द्रेण। (F);
६ Ther st. 4, 'F' gives the following stanza
नैष्कर्म्यसिद्ध्मिकरोत्सुरेश्वसमाह्वयः।
वार्तिक द्वितयं चाऽपि स चकार महामतिः।। After this 'B' & 'F' give the following lines
एवंभूतौ तु तौ शिष्यावाचार्यस्य बभूवतुः।
नृहरेरंशभूतस्तु सनन्दनसमाह्वयः।
विरिञ्चस्यांशभूतस्तु सुरेश्वरसमाह्वयः।।
७ यातुकामः। (B, C, D, E);
८ °कोत्तमः। (B)



अग्निचिद्भिः सूर्यविद्भिः[९] सर्वशास्त्रविशारदैः।
सदा[१०] दानरतैः शान्तैरन्वितं ब्राह्मणोत्तमैः।।७।।

स्वकर्मनिरताम् विप्रान् सद्वृत्तानप्रमादिनः[११]।
दृष्ट्वा न बध्यते[१२] जातु यत्प्रवेशोऽपमृत्युना[१३]।।८।।

द्विजानां विहरन्मध्ये शिवो गिरिसुतान्वितः[१४]।
यस्य नाम यथार्थं[१५] हि करोति करुणानिधिः।।९।।

सर्वलक्षणसंपन्नं वेदाध्ययनमन्वहम्।
द्विजानां यत्र गूढात्मा शृणोति[१६] चतुराननः।।१०।।

स्निग्धप्रवालनिचितैः[१७] प्रसूनफलसंनतैः।
विटपैरन्विता वृक्षा यत्र भान्ति निरातपाः[१८]।।११।।

अत्र[१९] पान्थजनो नित्यं प्रीतियुक्तेन[२०] चेतसा।
करोति विश्रमं भुक्त्वा[२१] यथेष्टं च दिवानिशम्।।१२।।

द्विजाहुतहविर्गन्धो यत्र पुण्यतमो महान्।
नीयमानोर्ध्ववातेन[२२] जनानां संहरत्यघम्।।१३।।

९ मयी°। (B, C, D, F); त्रयीचिद्भिः।।(E)
१० सदानतरतैः। (C);
११ स तु तान् प्र°। (B);
१२ लभ्यते। (B, C, D, E);
१३ This st. is not given in 'F';
१४ नाम सु°। (B);
१५ यथाभङ्गी। (F);
१६ करोति। (F);
१७ °निचयैः (B); विचितैः। (C);
१८ This stanza is not given in 'F'
१९ यत्र। (B, C, D, E, F);
२० नीति°। (F);
२१ भूत्वा। (B, D); कृत्वा। (F);
२२ °नोल्प°। (B, C, D, E, F);

आसीत्तस्मिन्[२३] द्विजश्रेष्ठो वेदोक्तविधितत्परः।
स्वदारतुष्टोऽनुदिनं पूजयन्नतिथीन् मुदा॥१४॥

कश्चि[redacted]स्यात्मजो जज्ञे चक्षुरादिप्रवृत्तिषु[२४]।
चेष्टासु च करादीनां निराशः सर्वदाऽज्ञवत्[२५]॥१५॥

बुभुक्षुर्न पिपासुश्च नाभवत्स कदाचन।
पिपीलिकादिसंदष्टे[२६] स्वदेहेऽप्यविकारवान्॥१६॥

एवंविधं सुतं दृष्ट्वा पिता चिन्तापरः सदा।
गोभूहिरण्यदानाद्यै[२७]-रन्वितोऽपि न[२८] तं दधौ॥१७॥

श्रुत्वा तत्रागतं विप्रः सपुत्रः प्राप देशिकम्।
मूर्ध्ना प्रणम्य स[२९] पृष्टः सुते[३०] नैराश्यकारणम्॥१८॥

जनैरारभ्य तत्रापि[३१] विद्यते नैव काङ्क्षितम्।
मत्सुतस्याऽस्य नीतोऽयमुपनीतिं[३२] कथंचन॥१९॥

जाड्यहेतुं यतीन्द्र त्वं मत्सुतस्य वद प्रभो।
भवादृशा हि जानन्ति सर्वं च विमलात्मनः[३३]॥२०॥

इति पृष्टो यतिश्रेष्ठः सोऽपृच्छद्द्विजनन्दनम्।
कस्त्वं द्विजात्मदैवं[३४] किं वर्तसे जडवत्सदा॥२१॥

२३ अभूत्°। (F);
२४ °प्रवर्तने। (F);
२५ °भवत्। (C);
२६ °संदग्धे। (F);
२७ °नाख्यै°। (B);
२८ शुचं। (B, C, D, E, F);
२९ सोऽपृच्छत्। (B, C, D, E, F);
३० सुतनै°। (A, B, C, D, E, F);
३१ कुत्रापि। (B, C, E, F);
३२ °नीतिः। (B); नीतोऽहमुपनीतं। (C, D);
३३ °त्मना। (B, C, D, E, F);
३४ द्विजात्मने चैवं। (B); तस्मिन् द्विजात्मनैवं। (C);



बालोऽप्यबालबुद्धिस्तमुत्तरं निजगाद सः।
हृद्यैर्द्वादशभिः पद्यैः प्रकाशितचिदात्मकैः॥२२॥

करस्थधात्रीफलवच्चित्स्वरूपं प्रकाशितम्।
तत्पद्यैः[३५] प्रथिताऽस्याऽख्या हस्तामलक इत्यभूत्॥२३॥

द्विजपुत्रं[३६] निवृत्तं तं विज्ञाय यतिपुङ्गवः।
ऊचे तत्पितरं[३७] वस्तु न चाऽयोग्यस्तवानुजः॥२४॥

देहगेहादिममता विद्यते नाऽस्य भूसुर।
बोधेनाऽयं[३८] मोहयित्वा परमं धाम पश्यति॥२५॥

इत्युक्त्वा विप्रसूनुं[३९] तं गृहीत्वा प्रस्थितो गुरुः।
किञ्चित्तमनुगत्याऽथ स्वगेहं प्राप्तवान् द्विजः॥२६॥

आचार्यो यतितां[४०] नीत्वां तं च भूसुरनंदनम्।
महात्मभिस्त्रिभिः[४१] शिष्यैर्विरेजे सुतरां ततः[४२]॥२७॥

तुरीयकोऽपि[४३] शिष्योऽभूदाचार्यस्य ततो महान्।
तोटकाख्योऽभवत्तस्य[४४] शिष्यस्तत्कारणं[४५] शृणु॥२८॥

विनीतो मितसत्योक्तिर्दयालुः सुतरां गुरोः।
तुतोष[४६] तत्परः सोऽभूच्छायेवानुसरन्[४७] सदा॥२९॥

३५ °द्यैर्हि ततोऽस्याख्या। (B, C, D, E);
३६ द्विजपुत्रस्य वृत्तान्तं। (F);
३७ ° नैव वस्तुयोग्यस्तवानुजः। (C); तत्पितरं नेह। (D, E)
ततः परं नेह वस्तुं योग्यो। (B);
३८ बोधेनाऽत्मतमो हित्वा।. (B); तमो हित्वा (C, D, E, F);
३९ विप्रतनुजं। (F);
४० °र्यः प्रथितो। (F);
४१ महात्मा तिसृभिः। (B);
४२ गुरुः। (F);
४३ तुरीयः कोऽपि। (B, C, D, E); तृतीयः। (F);
४४ °ख्या। (C, D);
४५ शिष्या। (B,C, D, E, F);
४६ शुश्रूषातत्परः। (B, C, D, E, F);
४७ °रत्। (B); °चरन्। (C);

गुरौ तिष्ठति वै तिष्ठन् गच्छन्गच्छति संततम्।
स्वपन् स्वपिति निर्वाणं[४८] प्रबुद्धे तु प्रजागरम्॥३०॥

गुरोस्तु[४९] वस्त्रकौपीननिर्मलीकरणे रतः।
दन्तकाष्ठप्रदाता च स्नानकाले यथोचितम्॥३१॥

अर्घ्यपाद्योपनेता च देवपूजारते गुरौ।
ब्रुवाणे सति यत्किञ्चित्तच्छृण्वन्नधिकादरः॥३२॥

गुरोः श्रीमत्पदाम्बोजसंवाहनविचक्षण।
अनुक्तोऽपि[५०] हितं कुर्वन्नहितं न कदाचन[५१]॥३३॥

इत्थं निजगुरौ भक्तिं निर्व्याजां निश्चलां भृशम्।
संभूतः[५२] सर्वदा तस्य मुखाम्भोजात्कदाचन[५३]॥३४॥

पद्यजातमुदारार्थमद्वैतप्रतिपादकम्।
तोटकाख्यमभूत्तस्मात्तोटकाख्यो बभूव सः॥३५॥

स्वेच्छानुवृत्तिचरितान्[५४] देशिकेन्द्रस्य[५५] विश्रुतान्।
लेभे शिष्यवरानेवं चतुरस्तत्त्ववेदिनः[५६]॥३६॥

संन्यासमूलः सच्छायः शिष्यशाखामहत्तमः।
ज्ञानपुष्पोऽमृतफलो रेजे शङ्करपादपः॥३७॥

**॥ इति श्रीशङ्कराचार्यचरिते षष्ठोऽध्यायः ॥**

---

४८ कुर्वाणः। (B, C, D, E); The second line of st. 30 is not given in 'F';
४९ गुरोः श्रीवस्त्र°। (B, C, D, F);
५० °क्तो विहितं। (C);
५१ In place of this stanza, F reads : गुरोस्तु देवपूजायै जलाद्याहरणे रतः।
५२ बिभ्रतः। (B, C, F); विभूतः। (B);
५३ 'E' does not give this stanza;
५४ °निरतान्। (B, C, D, E);
५५ °न्द्रः सुवि°। (B, C, D, E, F);
५६ °दर्शिनः। (C);

## ॥ अथ सप्तमोऽध्यायः ॥

एतैः शिष्यवरैः सार्धं चतुर्भिर्देशिकोत्तमः।
तीर्थस्नानानि[१] कुर्वाणश्चचार भुवि सर्वतः॥१॥

एकदा स हरिद्वारं तीर्थं प्रति गतो[२] गुरुः।
मार्गश्रमहरं पुण्यं तन्माहात्म्यमवोचत॥२॥

पुराऽभूदुत्कले देशे कोऽपि धर्मरतो द्विजः।
तस्याऽसीत्तनयः कश्चित्प्रकामं दुष्टमानसः॥३॥

व्याधैः सह मृगान् हत्वा विचरन् विपिनेषु सः।
तपोधनस्य कस्यापि शापात्प्राप पिशाचताम्॥४॥

अतीव विवशो दीनः क्षुधया च पिपासया।
अस्मिन्निपतितोऽरण्ये[३] मूर्छां प्राप कदाचन॥५॥

तदा स्नात्वा हरिद्वारे काचिद्गन्धर्वसुन्दरी।
हरविष्णुगणेशाद्यान् नत्वा तत्रत्यदेवताः॥६॥

प्रणन्तुं रामनाथं तं त्वरया[४] गगनाश्रिता।
जगाम तस्या वासोत्थः[५] पिशाचे मूर्छितेऽपतत्॥७॥

बिन्दुस्तस्यार्द्रवसनात्पतिते दैवयोगतः[६]।
गङ्गासलिलमाहात्म्यादुत्थितः सत्वरं ततः॥८॥

अपश्यत्सर्वमाशान्तं नितान्तं[७] शान्तमानसः।
आलोक्याऽसन्नगं[८] कण्वं मूले वटतरोः स्थितम्॥९॥

---

१ तीर्थस्नानरतो धीमान् (F);
२ महागुरुः। (C); शनैर्गन्तुं समुद्यतः। (F);
३ असौ नि°। (B, C, D, E, F);
४ आयाता। (F);
५ वासेषु। (C); वासोऽम्बु। (B, D, E, F);
६ This half is not given in B, C, D, E & F;
७ पिशाचः। (C, F);
८ दृष्ट्वा स्वनिकटे। (C, F); दृष्ट्वा स निकटे कुण्डं। (B);

आसाद्य विनयोपेतः पृष्टवानिति[९] द्रुतम्।
शान्तबुद्धिरहं कस्मादिदानीं मुनिपुङ्गव॥१०॥

अभूवं[१०] वद तन्मह्यं सर्वज्ञा हि भवादृशाः।
इति पृष्टः पिशाचेन कण्वो मुनिवरोऽब्रवीत्॥११॥

जन्मप्रभृति दुर्बुद्धेः[११] शृणु ते शमकारणम्।
स्नानात्तत्र[१२] हरिद्वारे तीर्थे भुवनपावने॥१२॥

गन्धर्वमहिला काचिदद्य[१३] याताऽम्बराश्रिता।
निःसृतो वसनात्तस्या गङ्गाजलकणोऽपतत्॥१३॥

सर्वपापहरोऽरण्ये मूर्च्छिते पतिते त्वयि।
तस्य तीर्थस्य माहात्म्यादीदृशोऽसि[१४] पिशाचक॥१४॥

तत्र स्नात्वा ततो याहि त्रिदिवं क्षीणकल्मषः।
इत्युक्तो मुनिना तेन पिशाचः प्रीतमानसः॥
हरिद्वारे कृतस्नानो दिव्यमूर्तिर्दिवं ययौ॥१५॥

इत्युदीर्य कथां रम्यां सर्वपातकहारिणीम्[१५]।
हरिद्वारमुपागत्य सशिष्यो देशिकोऽवसत्॥१६॥

श्रीपद्मपाद इत्येवमुपनाम[१६] कदाचन।
प्राप्तः सनन्दनाचार्यः शिष्यस्तत्कारणं शृणु॥१७॥

स्थिते पुण्यतमे तस्मिन् गङ्गाद्वारे यतीश्वरे।
आसीज्जातु मिथः स्पर्धा सनन्दनसुरेशयोः॥१८॥

ततः सुरेश्वरः प्रोचे विविक्ते देशिकोत्तमम्।
अद्याऽचार्य त्वया कार्यं स्नाने किञ्चित्प्रियं मम॥१९॥

९ पृष्टवांस्तं महामुनिम्। (C); °स्तं °मुनिः। (B);
१० तत्र हेतुं वदाऽस्माकं सर्वज्ञो हि भवान् मुने। (A, C, F);
११ दुर्बुद्धे। (F);
१२ स्नात्वा तत्र। (A, B, C, D, E, F);
१३ °धाया°। (D, E); यायाद्याकाश°। (F);
१४ त्प्रबुद्धो°। (C, F);
१५ °नाशिनीम्। (B);
१६ इत्येवंगुणनामा सुविश्रुतम्। (C, F); °वं गुणनाम। (D, B); °त्येतद्गुणनाम। (B, D, E);



प्रदातुमङ्गवस्त्रं ते सम्प्राप्ते तु सनन्दने।
नाभिदघ्नजले[१७] स्थित्वा त्वया हस्तः प्रसार्यताम्॥२०॥

तावद्रङ्गाङ्गवस्त्रं[१८] ते दाता चेद्विहितं व्रतम्।
अन्यथा ह त्वनास्था[१९] स्यात्तस्य नूनं प्रकाशिता॥२१॥

गुरुः सुरेश्वरेणोक्तं तत्तथैव[२०] चकार सः।
सनन्दनस्य माहात्म्यं कर्तुं लोके प्रकाशवत्॥२२॥

महाप्राज्ञो महायोगी सनन्दनयतीश्वरः।
जले तृणानि निक्षिप्य[२१] पादन्यासं तदाऽकरोत्॥२३॥

यतिर्यत्र[२२] पदन्यासं चक्रेऽसौ तत्र तत्र हि।
सलिलोपरि पद्मानि सञ्जातानि विरेजिरे॥२४॥

पदविन्यस्तपादाग्रो[२३] गुरवे स सनन्दनः।
वितीर्य[२४] च जलस्थाय देहसंमार्जनांशुकम्[२५]॥२५॥

तदानीं विस्मयोत्फुल्लमानसास्त्रिदिवालयाः।
श्रीपद्मपादनामाऽस्मै ददुर्लोकसुविस्मितम्[२६]॥२६॥

१७ नाभिदघ्ने जले। (D, E); तदा नाभिमिते तोये स्थित्वा हस्तः°। (C, F);
१८ 'C' & 'F' give this stanza thus :
तावदागत्य यदि चेदङ्गवस्त्रं प्रदास्यति।
व्रतोऽपि तस्य भग्नः स्यादवधेनाक्रमलक्षणम्।
अन्यथा तस्य नास्तिक्यं प्रकाश्यं च प्रकाशितम्।
तावद्गत्वाङ्ग°....द्रुतम्। (B); °त्वाङ्ग°... व्रतम् (D, E);
१९ त्वय्यनास्था। (B, D, D);
२० तथैव च। (C);
२१ °विक्षिप्य°.... व्रतम्। (A, B, D, E);
२२ यत्र यत्र। (B, C, D, E, F);
२३ °दाब्जो। (C);
२४ विततार। (A, B, C, D, E, F);
२५ °नाम्बरम्। (B, C, D, E, F);
२६ लोंकि सुविश्रुतम्। (B, C, F); लोकसुविश्रुतम्। (D, E);

काञ्चीपुरस्य माहात्म्यं शिष्य वक्ष्याम्यतः परम्।
यत्पुरा कथयामास शिष्येभ्यो भिक्षुकोत्तमः[२७]॥२७॥

रामसेतुं महापुण्यं द्रष्टुकामः कदापि[२८] सः।
स्वशिष्यैरन्वितो मोदात्प्रतस्थे यतिपुङ्गवः॥२८॥

दक्षिणां दिशमुद्दिश्यं प्रस्थितो देशिकोत्तमः[२९]।
गत्वा बहुविधान् देशान् स्नात्वा तीर्थजलेषु सः॥२९॥

श्रीकालहस्तिसंज्ञं तत्क्षेत्रं त्रैलोक्यविश्रुतम्।
सम्प्राप गिरिजाभर्तुर्महापातकनाशनम्[३०]॥३०॥

तत्र तीर्थजले स्नात्वा संयुतः शिष्यमण्डलैः।
उपेत्य संनिधिं देवमद्राक्षीद्गिरिजापतिम्॥३१॥

नानादीपप्रभाजालनिर्धूततिमिरोदरे।
अद्भुते भवने भान्तं[३१] प्रभामण्डलमण्डितम्॥३२॥

पुष्पमालासुगन्धेन सुरभीकृतदिङ्मुखम्।
प्रत्युप्तदिव्यरत्नेन[३२] हेमाभरणभूषितम्॥३३॥

---

२७ In place of this stanza, 'C' & 'F' give: एवं स्थितेऽथ काले तु हरिद्वारे महामतिः।

२८ कदाचन। (F);

२९ देशिकेश्वरः। (C, D, E);

३० In place of this half st., 'C' & 'F' give the following 4 lines :
सर्वपापहरं पुण्यं भुक्तिमुक्तिप्रदं नृणाम्।
श्रीमद्दक्षिणकैलाससंज्ञं च पृथिवीतले॥
तत्र गत्वा यतिश्रेष्ठः सुवर्णमुखरीजले।
स्नात्वा तु विधिवत्पुण्ये शिष्यवर्गसमन्वितः॥
'B' Gives the second of these 4 lines only;

३१ दान्ते। (F);

३२ °व्यरामौघम्। (C, F); °रत्नौघहेमा°। (B, D, E);



व्याघ्रचर्ममनोहारि[३३] विमलाम्बरराजितम्[३४]।
जटाजूटाग्रसंनद्धमुग्धचन्द्रकलान्वितम्[३५] [३६]॥३४॥

विधिविष्णुमहेन्द्राद्यैर्विगूढाकृतिभिः सुरैः।
सेव्यमानं मनुष्यैश्च भूरिपुण्यचयैः सदा॥३५॥

दृष्ट्वा तं शङ्करं देवं भवान्या सह[३७] भक्तिमान्।
स्तुत्वा चोपनिषद्वाक्यैर्ननाम शिरसा[३८] भृशम्॥३६॥

लब्धानुज्ञस्ततः शम्भोः प्रस्थितो देशिकेश्वरः[३९]।
निर्वाणधाम[४०] नृणां तत्काञ्चीपुरमवाप सः[४१]॥३७॥

काञ्चीपुरमवाप्तोऽयं शङ्करो यतिपुङ्गवः।
कथयामास शिष्येभ्यस्तन्माहात्म्यमनुत्तमम्॥३८॥

भूसुरो[४२] वा धरेन्द्रो वा वैश्योऽपि वृषलोऽपि वा।
अन्त्यजोऽनन्त्यजो[४३] वाऽस्मिन् मृतो भवति मोक्षगः४२॥३९॥

अनेकजन्मदं कर्म कृतवानपि मानुषः।
अत्र पञ्चत्वमापन्नो मोक्षं याति[४४] न संशयः॥४०॥

---

३३ °र्माम्बरधरं। (B, C, F);

३४ सर्पजालविभूषितम्। (B, C, F);

३५ °सुसुंनद्धं। (C);

३६ मृडचंन्द्रकलान्वितम्। (F); °कलाधरम्। (C); °लाञ्छितम्। (D, E);

३७ सहितं भवम्। (C, F);

३८ भुवि दण्डवत्। (C, F);

३९ In place of this half st. 'C' gives the following full st.
पुनः प्रदक्षिणं कृत्वा वन्दित्वा च पुनः पुनः।
तस्मादघहरात्क्षेत्रात्प्रस्थितो देशिकेश्वरः॥

४० °णमत्यतं। (C, F);

४१ तस्मात्काञ्चीम्°। (C, F);

४२ भूसुरेन्द्रो। (B, C, D);

४३ °वा मृतस्तस्मिन्नमृतो भवति ध्रुवम्। (C, F); °जोऽपि मृतो ह्य°। (B); °जो वाऽपि। (E);

४४ मुक्तो भवति मानवः। (C, F);

स्थित्वा क्षेत्रान्तरालेऽस्मिन् चिरमत्र मृतो[४५] नरः।
योऽस्माद्बहिर्गतो[४६] व्यङ्ग्यः सोऽपि याति परं पदम्॥४१॥

तथा मृतः पुरा कश्चिद्भूरिपातकसंचयः।
उभयेऽपि[४७] परीतास्तं विष्णोर्दूता यमस्य च॥४२॥

स्थित्वा शीर्षप्रदेशं[४८] ते विष्णुदूता महाबलाः।
पादाग्रे तस्थिवांसोऽन्ये वादानेवमकुर्वत[४९]॥४३॥

**विष्णुदूता ऊचुः** शिरः सकलगात्रस्य प्रधानं हि निधाय तत्।
अस्मिन्पुरे मृतोऽयं[५०] चानेयोऽस्माभिरसंशयम्॥४४॥

**यमदूता ऊचुः** मृतस्याङ्गनिवेशस्य विशेषः किं नु कथ्यते।
सर्वत्राऽपि मृतानां तु यमः शास्ता दुरात्मनाम्॥४५॥

जन्मप्रभृति पापिष्ठः पुरुषोऽयं मृतिं गतः।
सद्योऽयं नरके यस्मान्नेयोऽस्माभिरसंशयम्[५१]॥४६॥

**विष्णुदूता ऊचुः** कांच्यां बहिर्मृतो जन्तुर्नेयो नः[५२] कृतकिल्विषः।
नेतव्यो[५३] विष्णुलोकं हि काञ्चीपुरमृतो नरः॥४७॥

इत्युक्त्वा विष्णुदूतेषु गृहीत्वा तं गतेषु[५४] ते।
यमदूताश्च[५५] ते सर्वे लज्जाभीतिसमाकुलाः॥४८॥

४५ कृत्वा.... शिरोमात्रं मृतो नरः। (B, C, D, E, F);
४६ °र्गतप्राणः। (C); °र्गताङ्गाङ्गः। (B, D, E, F);
४७ उभये विपरी°। (C, D, E, F);
४८ तस्योपशीर्षान्ते। (B, C); °शीर्षं ते। (D, D);
४९ पादाने°। (A); पादेनैवमकुर्वता (C, F); पदा°। (D)
५० मृतो योऽयं। (B); मृतोऽयं वै। (C); मृतो यस्मात्। (D, E);
५१ दण्ड्योयं नरके तस्मान्ने°.... संशयः। (B, D); °यम्। (C); दण्ड्ये प्रहरके तस्मिन्....
मे संशयः। (C, F);
५२ र्जेयो। (C, F);
५३ साऽपि वै विष्णुलोका हि..... जनः। (C); °नरः। (F);
५४ तत्र तेषु। (B);
५५ °दूता गताः सर्वे। (B, C, D, E, F);



तद्वृत्तमखिलं श्रुत्वा स्वभूतेभ्यः[५६] परेतराट्।
तानुवाच प्रहस्यैवमात्मनाथान्[५७] कृपान्वितः॥४९॥

अस्माकमपि सर्वेषामीश्वरौ हरमाधवौ।
यूयं नमत भक्त्या तौ दूता[५८] मामिव सर्वदा॥५०॥

तयोरीशरमापत्योः[५९] पादाम्बुजनिषेविणः
गन्तव्यं दूरतस्त्यक्त्वा युष्माभिर्भुवनत्रये॥५१॥

हरे कृष्ण महादेव राम नारायणाच्युत।
हर शम्भो शिवेत्यादिनाम्ना विष्णुगिरीशयोः॥५२॥

सकृदेकाक्षरं वापि[६०] सर्वपातकनाशनम्।
ब्रुवतोऽन्तं गतान् मर्त्यान् दूरे मुञ्चत किंकराः[६१]॥५३॥

यः शृणोति[६२] च वेदान्तं जिज्ञासुः परमं पदम्।
भिक्षुको वाऽथवा[६३] विप्रस्तं च मुञ्चत दूरतः[६४]॥५४॥

काञ्चीपुरे च काश्यां च पुण्यक्षेत्रे तथाऽपरे[६५]।
मानुषा ये मृतिं यान्ति तान् दूतास्त्यजताखिलान्[६६]॥५५॥

भेदबुद्धिर्न कर्तव्या देवयोरुभयोस्तयोः।
विष्णुशङ्करयोर्नित्यं तावुभावैक्यगामिनौ[६७]॥५६॥

५६ °दू°। (B, D, E);
५७ रहस्ये°। (B, C, D, E, F);
५८ नावमंसत सर्वदा। (B); यूयं.... तो दूता नाव°...। (D, E);
५९ 'C' & 'F' do not give this half;
६० वाऽपि। (D, E);
६१ Between this st. & next, 'C' & 'F' give the following:
शालग्रामशिलापूजां शिवलिङ्गार्चनं तथा।
कुर्वतो मानुषान् सर्वान् मृतान्मुञ्चत किंकराः॥
६२ पठति। (C); पठेति। (F);
६३ भिक्षुको वा गृहस्थो वा यूयं°। (C, F); °वा तं च। (B, E);
६४ 'D' does not give this stanza;
६५ °ऽथवा परे। (C, F);
६६ ते शीघ्रं मुञ्चताऽखिलान्। (F);
६७ °भौ वेश्म°। (C, F);

शिवभक्तो हिविष्णुं च विष्णुभक्तांश्च[६८] निन्दति।
यो योऽस्य विपरीतश्च तावुभौ नयताऽशु माम्।।५७।।

सन्त्यजन्त्यात्मदारांश्च[६९] पक्तासमुत्सुकाः।
तान्मृतानाशु मे लोकान्नयध्वं[७०] किंकरा नरान्।।६८।।

पशुपक्षिगणं यान्तं[७१] तृषार्तं सलिलाशयम्।
यो वारयति दुर्बुद्ध्या[७२] तं च मां नयताञ्जसा।।५९।।

ये च[७३] वा पितृमात्रादिस्नेहविच्छेदकारिणः।
विच्छिन्नरसना[७४] घोरास्ते नेया नरकं मृताः[७५]।।६०।।

पितृदेवमनुष्येभ्यो ये नराः स्वयमन्वहम्।
अदत्वा भुञ्जते भक्तं ते नेया नरकं मृताः[७६]।।६१।।

येऽन्वहं[७७] मामबिभ्राणा वसन्ति सुखिनो नृपाः।
ते मृता नरकं घोरं नेयाः कुत्सितमानसाः ।।६२।।

यो निजाश्रमविभ्रष्टश्चतुराश्रमवासिनाम्।
निरये[७८] सोऽपि दण्ड्यः स्यात्किंकरा मम शासनात्।।६३।।

अर्थं प्रतिश्रुतं पूर्वं यो ददाति न लोभतः।
प्राग्दत्ते[७९] हरते यश्च तौ द्वौ यातौ दरिद्रताम्।।६४।।

---

६८ °क्तांश्च शाम्भवान्। (C, F);
६९ °दारान् ये। (B, C, D, E);
७० लोकं । (C, D, E);
७१ श्रान्तं। (F);
७२ तृष्णार्तं। (D, E);
७३ °बुंद्धिस्तं। (B); ये वाचा। (B, D, E);
७४ °घोरं। (B, D); °नं घोरं। (E);
७५ 'C' & 'F' do not give stt. 60, 61 & 62
७६ 'D' does not give this stanza;
७७ ये बन्धुताम°। (B, D, E);
७८ °येऽपि च। (C, F);
७९ प्रागुक्तं। (D);



स्वर्णचोरः[८०] सुरापश्च[८१] ब्रह्मघ्नो गुरुतल्पगः।
तत्संयोगी च पञ्चैते महापातकिनो नराः।।६५।।
ये च विश्वस्तहन्तारः ये चोरा[८२] कृतिविस्मृतिम्।
प्रयान्ति ते च दण्ड्याः स्युर्नरके वत्सरान्[८३] बहून्।।६६।।

अदण्ड्यलक्षणं सर्वं मया पूर्वमुदीरितम्[८४]।
विचार्यैवाऽखिला[८५] नेया मल्लोकं पापिनो मृताः।।६७।।

आदिश्यैवं यमो भृत्यानुवास निजविष्टपे।
न्यवसद्विष्णुलोके च काञ्चीपुरमृतो नरः।।६८।।

इति काञ्चीपुरं प्राप्तः शङ्करो देशिकेश्वरः।
शिष्यानुदीरयामास[८६] तन्माहात्म्यकथामृतम्।।६९।।

**।। इति श्रीशङ्कराचार्यचरिते सप्तमोऽध्यायः ।।**

---

८० °स्तेयी। (B);
८१ °पायी। (B, C, F);
८२ ये च पातकिनो नराः। (C, F); ये चोपकृतिवि°। (B, D, E);
८३ बहुवत्सरान्। (B, C, D, E, F);
८४ सर्व°। (C, F); °र्वमिती°। (D, E);
८५ विचार्य एष चानेथाः। (F);
८६ शिष्येभ्यः कथयामास। (B, C, F);

## ।। अथाऽष्टमोऽध्यायः ।।

एकाम्रनाथं देवेशं[१] काञ्चीपुरनिवासिनम्।
देविमल्लाळनाथं च नत्वा यातस्ततो गुरुः।।१।।

ततो भिक्षुवरः पुण्यं पुण्डरीकपुरं तथा[२]।
ताण्डवं कुरुते तस्मिन्महादेवो महानटः[३]।।२।।

यन्नृत्तमभिरामं सा पार्वती च धृतादरा।
वीक्षतेऽनिशवृत्तं च दर्शनाद्भवभञ्जनम्[४]।।३।।

अत्र किं वर्तते तीर्थमिति पृष्टो यतीश्वरैः[५]।
शिवपादाम्बुजासक्तचित्तः कोऽपि[६] नरोऽब्रवीत्।।४।।

शिवगङ्गाभिधानस्यं[७] तीर्थमत्र यतीश्वराः।
यत्र मज्जन् भवांभोधौ पुनर्नैव निमज्जति।।५।।

नृणां संसारविच्छित्त्यै शम्भुः करुणया स्वयम्।
अस्मिन् गङ्गाजलं किञ्चित्क्षिप्तवानिति केचन।।६।।

उक्तश्रमापनोदार्य[८] भर्तुः प्रणयविह्वला[९]।
गङ्गा परिणतिं याता शिवैवात्रेति केचन[१०]।।७।।

---

१ देवं च। (D, E);
२ ययौ। (B, C, D, E, F);
३ 'C' and 'F' give this half thus
यत्र नृत्यति देवेशः शङ्करः सम्यगादरात्। (C); °साददेतरात्। (F);
४ B, C & F Give this stanza as follows
तत्र (यत्र- 'B') नृत्तं समालोक्य पार्वती हरवल्लभा।
करजालं (तालं 'B') महादेवी करोति मुदितानना।
वीक्षते मुनिवृन्दं.... द°भय°। (E);
५ यतीश्वरः। (C);
६ कश्चित्। (B, C, F);
७ °गङ्गेति विख्याता। (B); °ति विख्यातं। (C, F); शिव°धानं स्यात्। (D, E);
८ नृत्य°। (C); वृत्त°। (B, D, E, F);
९ भर्तुश्च प्रिय° । (B, C); विक्लवा। (F);
१० गङ्गैव स्वयमायाता क्षेत्रेऽस्मिन्निति केचन।। (C, F);



तस्यास्तु शिवगङ्गायाः शुद्धिं वर्णयितुं पराम्।
सर्वज्ञः स्वयमेवाऽसौ शक्तो जगति नापरः[११]।।८।।

पद्मनाभमुखा देवास्तीर्थे तस्मिन् दिने दिने।
स्नात्वा शिवार्चनं कृत्वा भक्त्या पश्यन्ति ताण्डवम्।।९।।

शतयोजनदूरस्थः[१२] शिवगङ्गेति यो वदन्।
निमज्जति स च क्षिप्रं शुद्धो याति परं पदम्।।१०।।

इतीरिता[१३] यतीन्द्रास्ते शिवभक्तेन केनचित्।
श्रीशङ्करमुखाः स्नात्वा शिवगङ्गाजले शुचौ।।११।।

हर शम्भो महादेव देवदेव दयानिधे।
अस्मान् भक्तिसमायुक्तानुद्धराशु भवार्णवात्।।१२।।

इति संकीर्तनं कृत्वा गत्वाऽन्तर्भवनं शुभम्।
अपश्यन् गिरिजाकान्तं लोकत्रितयनायकम्।।१३।।

शारदाम्बुदसंकाशं[१४] बालचंन्द्रावतंसकम्।
आशान्तश्रितदोर्दण्डं[१५] शार्दूलाजिनवाससम्।।१४।।

भूषणोज्ज्वलसर्वाङ्गं नृत्तं[१६] कुर्वन्तमद्भुतम्।
वेदान्तरसमुद्रान्तरूढानन्दमधुव्रतम्[१७]।।१५।।

---

११ Between stt. 7 & ८, B, C, D, E, F read the following stanza
नृत्यद्धूर्जटिकोटीरात्पतितं जाह्नवीजलम्।
किञ्चिदत्रेति तत्प्राहुः (तं प्राहुः 'B') शिवगङ्गेति सा परा (केचन - (B, D, E);
चापरा। (F);
१२ °साहस्र°। (C, F);
१३ इत्युक्तास्ते यतिश्रेष्ठाः। (B, C, F);
१४ °दाम्बुज°। (C);
१५ आशाव्यापृत°। (C, E); °व्यावृत्त°। (B, D, F);
१६ नृत्यं। (E);
१७ This half of st. 15 & 1st half of st.16 are not given in 'C'; 1st half of st. 15 is given in 'B' & "F' as: वेदान्तागमपद्मान्तर्गूढा° & in 'D' °वर्त्मान्त°।

स्नात्वा नत्वा[१८] च तं देवं सशिष्यो यतिपुङ्गवः।
रामसेतुमनुस्मृत्य प्रस्थितोऽभूत्तदा[१९] मुदा॥१६॥

गच्छन्नध्वनि कावेरीं सरितं संददर्श सः।
यत्र स्नात्वा हरौ भक्तिं मुक्तिदां यान्ति[२०] मानवाः॥१७॥

यस्याः पावनतोयायाः मध्ये स्वर्णमयं महत्[२१]।
क्षेत्रमाभाति विख्यातं लोके श्रीरङ्गसंज्ञया[२२]॥१८॥

तत्र स्नात्वा यतीन्द्रस्तं सशिष्यः कमलापतिम्।
ददर्श भोगिशय्यायां भान्तं श्रीरङ्गसंज्ञया॥१९॥

राजन्मुख्यमणिव्रातसंशोभितपदाम्बुजम्[२३]।
इन्द्रनीलमहादण्ड[२४] चारुजङ्घायुगान्वितम्॥२०॥

हस्तिहस्तसमुल्लासिवृत्तपीनोरुभासुरम्।
स्वर्णकाञ्चीलतानद्धपीताम्बरविराजितम्[२५]॥२१॥

नाभीसरिजावास[२६] चतुर्मुखसमीडितम्।
निःशेषभुवनन्यासमन्दिरोदरसुन्दरम्[२७]॥२२॥

श्रीवत्सद्युतिसंमिश्र[२८] कौस्तुभेनाऽतिमण्डितम्[२९]।
इन्दिरासुन्दरागारवक्षःस्थलमनोहरम्[३०]॥२३॥

---

१८ स्तुत्वा। (A, B, C, D, E, F);
१९ °तोऽयं। (C); °तोऽथ। (F); °भूत्ततो। (A, B, E);
२० लभते नरः। (C, F);
२१ हरेः। (B, C, F);
२२ °संज्ञितम्। (C, F);
२३ राजन्नख°। (B, C, D, E, F);
२४ °नीलप्रभाचोरजङ्घायुगलशोभितम्। (B, D, E);
२५ °लतानन्द°। (A); °तानद्धं पी°। (B);
२६ °वासि°। (C);
२७ °रोदार°। (F);
२८ °त्सोद्यत°। (C, F); °द्योत°। (B, D, E);
२९ °भद्युति। (B, C, D, E, F);
३० °भार°। (B); °कार° (C, F);



शङ्खचक्रासि[३१] शाङ्र्गादिविद्योतितकराम्बुजम्।
शारदेन्दुमनोहारि सुषमाभासुराननम्॥२४॥

कारुण्यतटि[३२] नीवीचिनृत्यन्नेत्रसरोरुहम्[३३]।
दधानं काञ्चन[३४] मौलिं कोटिमार्तण्डजित्वरम्[३५]॥२५॥

निर्जिताम्भोधरच्छायं कमलामेदिनीयुतम्।
तुलसीदामसौरभ्यलम्भसंभ्रान्तषट्पदम्॥२६॥

नत्वा तस्य पदाम्भोजं रमाकान्तस्य[३६] शङ्करः।
अर्चयित्वा ततः स्तुत्वा प्रतस्थे शिष्यसंयुतः॥२७॥

रामसेतुमथाऽसाद्य सशिष्यो यतिपुङ्गवः।
धनुष्कोटिमहातीर्थे स्नानं कृत्वा यथाविधि॥२८॥

अस्मत्पापानि सर्वाणि संहराशु दयानिधे।
नमस्ते रामनाथेति ननाम शिरसा शिवम्॥२९॥

रामनाथाभिधानोऽभूत्ततोऽसौ[३७] गिरिजापतिः।
इति पृष्टस्तदा शिष्यैराचार्योऽकथयन्मुदा॥३०॥

पुरा दशाननं हत्वा युद्धरङ्गे स राघवः।
अभिषिच्य च तद्राज्ये निजभक्तं बिभीषणम्॥३१॥

अग्निशुद्धां समादाय जानकीं प्रमदोत्तमाम्[३८]।
ससैन्यो मुनिभिः सार्धमगस्त्याद्यैः पुरीं ययौ॥३२॥

---

३१ °क्रादि°। (F);
३२ °तरुणीवी। (F);
३३ °नित्यनेत्र°। (C, F);
३४ हेममुकुटं। (B, C, F);
३५ मार्तण्ड°। (B, D, F) °भासुरम्। (C, F);
३६ रमानाथस्य। (B); रङ्गनाथस्य। (C, F);
३७ °नामा°भूत्कुतोऽभू°। (C, F); °भूत्कुतो°। (B, D, E);
३८ प्रमदाकुलः। (A, D, E);

स गच्छन्सेतुमार्गेण चापकोट्या[३९] रघूत्तमः।
भित्वा[४०] स्थानत्रये सेतुं बभाषे कुम्भसम्भवम्॥३३॥

ऐशानं पावनं लिङ्गमत्र स्थापयितुं महत्।
अहं वाञ्छामि तत्र त्वं सहायो भव मे गुरो[४१]॥३४॥

ततस्तथेति निर्दिष्टो[४२] मुनिना भरताग्रजः।
हनूमन्तमुवाचेदं[४३] महाबलपराक्रमम्॥३५॥

हनूमन्नर्मदां गत्वा लिङ्गमानय[४४] सत्वरम्।
अधुना तत्प्रतिष्ठायै मुहूर्तः संनिधिं गतः॥३६॥

इत्युक्तो मारुतिस्तेन नर्मदां प्राप्य सत्वरम्।
विचित्य तज्जले लिङ्गं नापश्यत्तरसैव सः॥३७॥

समागते मुहूर्ते च मारुतावप्यनागते।
राघवः संभ्रमोपेतः कुम्भोद्भवगिरा ततः॥३८॥

तत्रैव वर्तमानं[४५] स शिवलिङ्गं पुरातनम्।
स्थापयित्वा तथा[४६] दत्तं ननाम जनितादरः[४७]॥३९॥

आजगाम ततो वेगात्सलिङ्गो मारुतात्मजः।
तत्र लिङ्गान्तरं दृष्ट्वा स्थापितं स रुषं[४८] ययौ॥४०॥

---

३९ धनुष्कोट्या। (B, C, F);
४० छित्वा। (B, C, D, E, F);
४१ 'B', 'C' & 'F' give this st. thus शिवलिङ्गं प्रतिष्ठाप्य सेतावत्र महामुने।
गन्तुमिच्छाम्यहं तत्र सहायो भव मे गुरो॥
४२ तथेत्युक्तस्ततो रामः। (C, F);
४३ °चैवं। (A, B, D, E);
४४ °मादाय। (F);
४५ वर्तमानः सन्। (C, F) °नं सच्छिव°। (D, E, F);
४६ यथावत्तं। (B, C, F); °वत्तत्। (D, E);
४७ °दरम्। (C, D, E, F);
४८ रुषा। (B, C, D, F);



रामस्तदाऽब्रवीद्वीरं[४९] हनूमन्तं कृपान्वितः।
कस्मात्त्वं रोषमायासि वत्स मारुतनन्दन॥४१॥

हनूमानब्रवीद्रामं ततः कोपसमन्वितः।
स्वामिना मत्प्रयत्नो ही मानुषेन्द्र वृथा कृतः॥४२॥

एतल्लिङ्गं समुद्धृत्य मयाऽऽनीते प्रतिष्ठिते।
राम यास्यति मे कोपो नाऽन्यथा भक्तवत्सल॥४३॥

इत्युक्तो[५०] रघुवीरस्तं[५१] प्रोवाच पवनात्मजम्।
स्थापितं लिङ्गमुद्धर्तुं नैव शक्तोऽस्मि[५२] मारुते॥४४॥

इदं लिङ्गं समुद्धृत्य त्वमेव पवनात्मज।
स्थापयाऽऽशु त्वयाऽऽनीतं नर्मदालिङ्गमुत्तमम्॥४५॥

बलिनाऽथ कपीन्द्रेण लिङ्गं लाङ्गूलवेष्टितम्।
उत्क्रष्टुं नाऽशकत्किञ्चित्[५३] त्रिलोकी चलिताऽखिला॥४६॥

चचाल मेदिनी सर्वा सवनाब्धिनदीनगा।
निद्रां तत्याज[५४] पद्माक्षः समाधिं मुनयोऽत्यजन्॥४७॥

निजपुच्छेन तल्लिङ्गं बद्ध्वा बभ्राम मारुतिः।
स पपात ततो दूरे मूर्च्छितो रुधिरं वमन्॥४८॥

अद्यापि वर्तते तीर्थं[५५] तद्वान्तं शोषितं महत्।
तन्नामविश्रुते कुण्डे सर्वपापहरं नृणाम्॥४९॥

लब्धसंज्ञः शनैर्गत्वा लिङ्गात्मानं शिवं नमन्।
अप्रमेयानुभावं तमस्तौषीत्कपिसत्तमः॥५०॥

---

४९ रामस्तम°। (B, C, D, E);
५० °क्त्वा। (F);
५१ रघुनाथ°। (E);
५२ शक्नोमि। (C);
५३ नाऽचल°। (B, C, D, E, F);
५४ त्यजति। (D, E);
५५ तीर्थे। (F);

नमस्ते सर्वलोकेश पाहि मां भक्तवत्सल।
अपराधं ममाशेषं क्षमस्व करुणानिधे॥५१॥

देवदेव जगन्नाथ पार्वतीश्वर[५६] शङ्कर।
ममाज्ञानकृतं पापं क्षमस्व सकलं विभो॥५२॥

यामाहुः सर्वभूतानां प्रकृतिं सृष्टिवेदिनः।
या च गन्धगुणा[५७] तस्यै धरामूर्त्यै मनोऽस्तु[५८] ते॥५३॥

या सृष्टा प्रथमं धात्रा सर्वसृष्टिकृता विभो।
या वै रसगुणा तस्यै तोयमूर्त्यै नमोऽस्तु ते[५९]॥५४॥

विधिवद्द्विजवृन्देन हुतं वहति या हविः।
या च रूपगुणा तस्यै वह्निमूर्त्यै नमोऽस्तु ते॥५५॥

प्राणवन्तो भवन्त्येव[६०] प्राणिनः सकला यया।
या च स्पर्शगुणा तस्यै वायुमूर्त्यै नमोऽस्तु ते॥५६॥

इदं चराचरं विश्वं याऽखिलं व्याप्य वर्तते।
या च शब्दगुणा तस्यै नभोमूर्त्यै नमोऽस्तु ते॥५७॥

ऋतुमासायनद्वन्द्वदिनरात्रीः करोति या।
या चोद्धुततमा[६१] तस्यै भानुमूर्त्यै नमोऽस्तु ते[६२]॥५८॥

वितीर्णकुमुदामोदा[६३] जगतां तापहारिणी।
या च ते भूषणं तस्यै चन्द्रमूर्त्यै नमोऽस्तु ते॥५९॥

या तु वेदोदितं मार्गं निर्वहन्तीह विद्यते।
यजमानात्मिकां[६४] मूर्तिं स्वान्तर्भूतां नमाम्यहम्॥६०॥

५६ पार्वतीवर। (A, B, C, D, E, F);
५७ सर्वगुणा। (C, F);
५८ नमो नमः। (F);
५९ This stanza is not given in 'D' & 'E';
६० भवन्त्येते। (A, B, C, D, E, F);
६१ °दधृ°.। (C, F); °र्ध्वू°। (B), °दधू°। (E);
६२ 'D' does not give this st. 58 & the next;
६३ °मोदज°। (C, E, F);
६४ °त्मिका मूर्तिस्तावकीं तां। (C, F); मूर्तिस्तावकीं तां। (B, C, D, E);



यद्गन्धमात्रमाजिघ्रन् म्रियते प्राणिसंचयः।
कालकूटः स ते यस्य[६५] कण्ठभूषणतामगात्॥६१॥

त्रयाणामपि[६६] लोकानामीश्वरास्त्रिपुरासुराः।
भस्मीकृताः क्षणेनैव यस्य ते नयनाग्निना॥६२॥

तं त्वामिमं जगन्नाथमुद्धर्तुं कृतकाङ्क्षितः[६७]।
मदन्यः कोऽपि मूढात्मा विद्यते न जगत्त्रये॥६३॥

तत्क्षन्तव्यस्त्वया सर्वोऽप्यपराधस्त्वया[६८] प्रभो।
भक्तस्य तव[६९] भृत्यस्य सुतरां मूढचेतसः॥६४॥

इति स्तुतेन देवेन[७०] तुष्टेन करुणाब्धिना।
कं वरं वाञ्छसीत्युक्तो हनुमानित्युवाच सः॥६६॥

तावकं लिङ्गमानीतं यत्नेन भगवन्मया।
प्रतिष्ठामस्य वाञ्छामीत्यर्थितो[७१] विभुरब्रवीत्॥६६॥

अन्त[७२]सारं त्वया लिङ्गं स्थापितव्यमिदं दिशि।
उत्तरस्यां जगत्येतत्त्वन्नाम्ना ख्यातिमेष्यति॥६७॥

त्वत्पूजितं कपे लिङ्गं पूर्वमालोक्य मानुषाः।
द्रष्टारो मा न चेत्तेषां दर्शनेन भवेत्फलम्॥६८॥

शम्भोरिति समादेशं राघवस्याऽपि लब्धवान्।
प्रतिष्ठां मारुतिर्निन्ये स्वानीतं[७३] लिङ्गमैश्वरम्॥६९॥

६५ सर्पः। (B);
६६ 'B' gives this half thus: त्रैलोक्या नाशकर्तारो ये वै ते त्रिपुराः सुराः। एवैतेऽत्र पुरासुरा (F);
६७ °कृतनिश्चयात्। (B, C, F); °कांक्षितम्। (A); कांक्षितात्। (D, E);
६८ °राधो मम। (A, B, C, D, E, F);
६९ मम। (F);
७० तुष्टेन देवेन। (A, B, C, D, E, F);
७१ °त्युत्थितो। (F);
७२ ऊर्ध्वं दं इददूहदू
७३ स्थापितं। (F);

रामेश्वर[७४] इति ख्यातो रामपूजित ईश्वरः।
हनुमत्पूजितो[७५] यस्तु विश्रुतोऽभूत्तदाख्यया॥७०॥

सेतुस्नानं महापुण्यं कृत्वा चेश्वरवनन्दनम्।
दानादिसुकृतं कुर्वन् मुच्यतेऽखिल[७६]पातकैः[७७]॥७१॥

स्नानदानमहादेववन्दनादिषु[७८] यत्फलम्।
तत्फलं लभते सेतौ पादस्पृष्टोऽपि[७९] मानुषः॥७२॥

सेतुनाथासमर्थो[८०] यः सुदूरस्थः स्मरत्यमुम्।
सोऽपि पातकसंघातैरखिलैरपि मुच्यते॥७३॥

इत्युदीर्य यतिश्रेष्ठो रामेश्वकथां शुभाम्।
सशिष्यः प्रस्थितस्तस्मात्तीर्थस्नानामलाशयः[८१]॥७४॥

**॥ इति श्रीशङ्कराचार्यचरितेऽष्टमोऽध्यायः ॥**

---

७४ 'F' does not give this half st.;
७५ °तोऽन्यस्तु। (B, C, D, E, F);
७६ °ते सर्वपा°। (C);
७७ 'F' does not give this line
७८ °दानान्महा°। (C);
७९ °ष्टे हि। (C, D, E, F); वायुस्पृष्टो। (B);
८० 'F' does not give this line;
८१ °यात्। (C);

## ॥अथ नवमोऽध्यायः ॥

सर्वज्ञः शिष्यसंयुक्तः शङ्करो देशिकेश्वरः।
भूमिं प्रदक्षिणीकृत्य भूयः[१] काञ्चीपुरं गतः॥१॥

जम्बूद्वीपस्य कुर्वाणः[२] शोभां भारतमण्डले।
शस्तं काश्मीरनामानं देशं विद्योतयन् भृशम्॥२॥

कामाक्ष्या नाम वाग्देव्याः स्थानं तत्पुरमाप्तवान्[३]।
सर्वज्ञपीठमारोढुमियेष यतिपुङ्गवः॥३॥

वादिभिर्जैमिनीयान्तैः काणादादिभिरुद्धतैः।
स्वे स्वे शास्त्रे रहस्यं यत्तत्पुष्टः शङ्करो महान्॥४॥

यथावदुत्तरान्सर्वान्[४] समुदीर्य च[५] सत्वरम्।
आरुरुक्षुरभूत्पीठं तदैका भारती श्रुता॥५॥

कामशास्त्रस्य तत्त्वज्ञः किं भवान् यतिपुङ्गव।
अस्य दत्वोत्तरं पीठं पुनरारुह्यतां त्वया॥६॥

आकर्ण्य विस्मितो धीमान् वचनं तदमानुषम्।
सर्वं बुद्ध्या विनिश्चित्य देवीमेवमयाचत[६]॥७॥

तस्योत्तरमहं[७] वक्ष्ये गते हि दिनसप्तके।
हे[८] भारति दयाम्भोधे देहि मे तावदन्तरम्॥८॥

---

१ जवात्। (C, F);
२ कुर्वाणे। (D, E);
३ After आप्तवान्, 'B' gives the line तत्रत्यैः सर्वविद्वद्भिः पूज्यमानो दिने दिने।
४ °त्तरं स°। (A, C, D, E, F);
५ महामतिः। (B, C, F);
६ °मभाषत। (F);
७ अस्यो°। (F);
८ This line is not given in 'F';

देव्या तथेत्यनुज्ञातस्ततो योगी स[९] शङ्करः।
स्वदेहरक्षणे शिष्यानादिश्य तरुकोटरे॥९॥

स्थित्वा निजतनुं त्यक्त्वा परमेण समाधिना।
विवेशामरुकाख्यस्य राज्ञः कायं गतासुकम्॥१०॥

नरदेवशरीरस्थस्ततो राजवधूजनैः।
विधाय राजगेहेषु निवासं दिनसप्तकम्॥११॥

वात्स्यायनरहस्यार्थं ज्ञात्वा सर्वं च बुद्धिमान्।
तद्व्याख्यानं च कृत्वा स प्रविवेश निजां तनुम्[१०]॥१२॥

अथ तां भारतीं देवीं द्रुतमासाद्य शङ्करः।
तस्याः प्रश्नोत्तरं सर्वं निजगाद महामतिः॥१३॥

तदा तं भारती प्रोचे कस्मात्त्वं यतिपुङ्गव।
वात्स्यायनार्थतत्त्वज्ञो विना[११] स्वाश्रमकल्मषम्॥१४॥

अथ तां शङ्करः प्रोचे परकायप्रवेशतः।
कामशास्त्ररहस्यानि मया ज्ञातानि भारति॥१५॥

जन्मप्रभृति देहेऽस्मिन्नैवाऽहं कृतकिल्बिषः।
इत्युक्त्वा तदनुज्ञातः पी[redacted]रूढो निविष्टवान्॥१६॥

मानितो यः सदा सद्भिर्वाग्देव्या[१२] च सुविस्मयम्[१३]।
महानुभावैः[१४] स्वैः शिष्यैः प्रतस्थे शङ्करस्ततः॥१७॥

ततः क्षेत्राणि पुण्यानि तीर्थानि च निषेव्य सः।
क्रमेण शिष्यसंयुक्तो वृषाचलमवाप्तवान्॥१८॥

---

९ योगीश्वरो यतिः। (B, C, F);
१० This line is not given in 'F';
११ विगताश्र°। (B);
१२ तोऽथ सभासद्भिः। (B, C, D, E, F);
१३ सवि°। (B);
१४ °भावः। (B);



तत्र दक्षिणकैलासे निवसन्नेकदा गुरुः।
ज्ञात्वा निजशरीरान्तं सह[१५] शिष्यैः प्रसन्नधीः॥१९॥

कासारे पश्चिमे[१६] स्नात्वा नत्वा तत्रत्यमीश्वरम्।
श्रीमूलस्थानमासाद्य चक्रे तस्य प्रदक्षिणम्॥२०॥

गोपुरेणान्तराविश्य कृष्णं नत्वा यतीश्वरः।
वाहनेन्द्रं पुरारातेर्गत्वा वृषभमानमत्[१७]॥२१॥

केरळावनिकर्तारं हर्तारं[१८] सर्वभूभृताम्।
सोऽनमद्भार्गवं रामं नृणामवनतत्परम्॥२२॥

सिंहोदरमथार्यं[१९] च नत्वा कुर्वन् प्रदक्षिणम्।
शङ्खचक्रगदा विष्णोरायुधानि ननाम सः[२०]॥२३॥

ततो[२१] भक्तिसमायुक्तः प्रविश्य भवनोदरम्।
नृत्तं भगवतः शम्भोर्दृष्ट्वा[२२] नतफणीश्वरः॥२४॥

मूर्तित्रयं च हेरम्बं पार्वतीमपि देशिकः।
यथावद्बहुशो नत्वा मण्टपेषु[२३] ननाम सः॥२५॥

बहूनि स्तोत्रमुख्यानि देवीत्रितयवन्दने।
चक्रे स शङ्कराचार्यो भृशं भक्तिसमन्वितः[२४]॥२६॥

---

१५ सशिष्यैश्च। (C);
१६ °मे तीरे.... ° त्वा चेश्वरम्। (F);
१७ St. 21 and the 1st half of st. 22 not given in 'F';
१८ भर्तारम्। (C);
१९ °मथाचार्यं। (B);
२० St. 23 & fist half of st. 24 are not given in E and second half of st. 23 is not given in 'F';
२१ भवनांतरम्। (F);
२२ नत्वा। (A, C, D, F); नत्वाऽनन्तं फणीश्वरम् (B); नत्कऽनन्तफणीश्वरः। (E);
२३ °पेच।
२४ In place of stt. 25 & 26, 'F' reads as follows:
ततो हरिहरं चैव दक्षिणेशं रमापतिम्।
यथावद्वन्दनं कृत्वा.... तयवन्दने॥ चक्रे (स) शंकराचार्यः शिष्यैरतिसमन्वितः॥

नारायण मुरारे[२५] हे कृष्ण गोविन्द माधव।
पाहि मा शरणं प्राप्तमाशु संसृतिसागरात्॥२७॥

हर विष्णो महादेव वैकुण्ठ गिरिजापते।
लक्ष्मीरमण मां पाहि भवाम्भोधेः सुविस्तरात्[२६]॥२८॥

हर रुद्र मृडेशान शम्भो गिरिश शङ्कर।
गङ्गाधर पुराराते गिरीश मदनान्तक॥२९॥

वेदान्तवेद्य सर्वज्ञ नमस्ते भगवन् विभो।
प्रपन्नं पाहि मामेनं भवाम्बुधिनिमज्जनात्॥३०॥

अज्ञानाद्वा[२७] विजानन्वा जन्मन्यत्रापरत्र[२८] वा।
यदकार्षमहं पापं तत्सर्वं हर संहर॥३१॥

देवत्रयमिति स्तुत्वा भासमानं वृषाचले।
शिष्यैः सह बहिर्गत्वा[२९] प्रदेशे कुत्रचिद्गुरुः॥३२॥

निविष्टः सुप्रसन्नात्मा सर्वमापादमूर्धजम्।
यथावच्चिन्तयामास वैष्णवं रूपमादरात्॥३३॥

वाञ्छितं निर्जरैः सर्वैः शिरसा धर्तुमन्वहम्।
विष्णोः पादसरोजन्म[३०] पांसुपूरमघापहम्॥३४॥

चक्र[३१]मत्स्यादिरूपाभिरन्याभिरखिलामरैः[३२]।
रेखाभिः शोभमानं[३३] तत्पादाम्बुजतलद्वयम्[३४]॥३५॥

---

२५ मुराराते। (B, C, D, E);
२६ सुदुस्त°। (B, C, D, E);
२७ अजानन्वाऽपि जानन्वा। (C); °नन्नपि जानन्वा। (B, E); °न्नविजा°। (D);
२८ °त्रप°। (A, B, C, D, E);
२९ महायोगी। (C, F)
३० पादरजो°। (F);
३१ चक्रे म°। (C, F);
३२ °भिर्वन्द्या°। (B, C, D, E, F);
३३ मोदमानं। (C, F);
३४ °पदा°। (B, F);



बलियज्ञे समाक्रान्तभुवनत्रितयं महत्।
पादपल्लवयुग्मं च शारदाम्भोजसम्भवम्॥३६॥

हिमाम्बुकणिकाभूषिता[३५]म्भोरुहतलाञ्चितम्[३६]।
पादयुग्माङ्गुली[३७] राजन्[३८] नखरत्नविराजितम्॥३७॥

हरिन्मणिमहाकूर्मशोभाहारिङ्[३९]शरीरिणम्।
श्रेयःप्रदायि दैत्यारेः पादाग्रयुगलं च यत्[४०]॥३८॥

इन्द्रनीलशिलादण्डसुन्दराकारशोभिते[४१]।
इन्दिराकरसंस्पृष्टे[४२] जङ्घे सूरीन्द्र[४३]-वन्दिते॥३९॥

चित्तादर्शनिधानार्थं[४४] निर्मितामिव योगिनाम्।
समुद्गयुगलीरम्यां[४५] वृत्तां जानुद्वयीं हरेः॥४०॥

मधुकैटभदैत्येन्द्रवन्ध्यस्थलमपि[४६] स्फुटम्।
जगत्पावनमुख्यं तदूरुद्वन्द्वं च भासुरम्॥४१॥

वाडवाग्निप्रभाभूषितार्णवाम्बुसमुज्ज्वलम्[४७]।
उदारजघनद्वन्द्वं[४८] पीताम्बरविराजितम्॥४२॥

---

३५ ०भूतम०। (ण, इ);
३६ °दलञ्चिताम्। (D, E, F); °न्वि°। (B, C);
३७ पद्मयु°। (B); पादयुग्माङ्गुरादि यः नवः॥ (F);
३८ राजी। (C); राजिं। (B, D, E);
३९ °हारि° °णाम्। (B, D, E);
४० तत्। (B, C, D, E, F);
४१ संयुते। (B, D, E);
४२ संतुष्टे। (C); संमृष्टे। (A, B, D, E); संजुष्टे। (F);
४३ सुरेन्द्र°। (C);
४४ °विधा°। (F);
४५ °गलीं रम्यां। (B, C, D, E);
४६ °न्द्रमध्य°। (B, C, F);
४७ °समप्रख्य°। (F);
४८ उदारं ज°। (B, C, D, E);

नानाविधमणिव्रातकिरणावलिपूरितम्[४९]।
काञ्चनीमपि काञ्चीं च[५०] बद्धां पीताम्बरोपरि।।४३।।

स्वर्णादिकर्णिकां बिभ्रद्रायद्ब्रह्मालिमंदिरम्।
नाभिसरसि सञ्जातमम्भोजमपि भूमयम्।।४४।।

काञ्चनोदरबद्धाभ[५१]वडवाग्निप्रभाचितम्।
योगिमानसमत्स्थानामावासमुदरार्णवम्[५२]।।४५।।

नाभीजलरुहामूलाद्वक्त्रपङ्केरुहोन्मुखीम्[५३]।
यान्तीमिवालिमालां तां रोमराजिं च वैष्णवीम्।।४६।।

कौस्तुभांशुप्रवालाढ्यं मुक्ताफलविराजितम्।
वक्षोभागरमोद्यानं[५४] श्रीवत्सस्तवकाञ्चनम्[५५]।।४७।।

आघ्रातकुसुमामोदद्विरेफमुखरीकृताम्।
मालां मालालितां दिव्यामंसद्वयधृताञ्चिताम्[५६]।।४८।।

शङ्खचक्रगदापद्मनन्दकाद्युपलक्षिताम्।
विश्वरक्षासमुद्युक्तान् क्षत्रसृष्टिकृतो भुजान्।।४९।।

स्वर्णकुण्डलसञ्जातैरुद्योतैरुपशोभितम्।
कण्ठमालिङ्गने[५७] लक्ष्मीकंकणालिपदाङ्कितम्।।५०।।

---

४९ पूरिताम्। (B, C, D, E);
५० तां नद्धपी°। (C); च नद्धां पी. (A); तां नद्धां पी°। (B, D, E, F);
५१ नोपरिनद्धाभा वाड°। (C); °भा बान्धवा°। (F); °दर° भावा° (B);
काञ्चनीमपि काञ्चीं तां न° (D, F);
५२ °दका°। (A);
५३ °होन्मूलां व°। (C, F); °होमूलाद्व°। (B, D, E);
५४ वक्षोजनगरोद्यानश्री°... न्वितम्। (C, F); °भागं रमो°। (B);
५५ °काञ्चितम्। (A, B, D, E);
५६ 'C' & 'F' do not give the second half of this stanza;
५७ कर्ण°। (B, C, F);



पद्मानन्दकरं[५८] पूर्णदन्ततारौघतेजसम्[५९]।
दन्ताम्बरसहस्रांशुवक्त्राम्बर[६०]- विराजितम्।।५१।।

इन्द्र-नीलशिलाक्लृप्तसुन्दरादर्शजित्वरम्[६१]।
गण्डमण्डलयुग्मं च कुण्डलोद्योतमण्डितम्।।५२।।

घोणादण्डाम्ब[६२]रापक्वबिम्बदर्शनकाङ्क्षिणः[६३]।
शुकस्य तुण्डवत्कान्तं शोणं कुङ्कुमशोभया[६४]।।५३।।

त्रैलोक्यमन्दिरालोकदीपचन्द्रारार्करूपिणे[६५]।
नेत्रपद्मे पदाम्भोजे[६६] संश्रितादिदयापरे[६७]।।५४।।

सदा नियमिताशेषलोकत्रितयमुल्लसत्।
भ्रूयुगे भग्नमध्यं च शोभाविजितषट्पदम्[६८]।।५५।।

पद्माकटाक्षसंफुल्लं[६९] पद्मार्चितमनारतम्।
शिवलिङ्गं ललाटस्थमूर्ध्वपुण्ड्रमयं[७०] च तत्।।५६।।

महादेवशिरोगङ्गास्पर्धया[७१] यमुनामिव।
आरुह्याजशिरोधस्ताद्गलन्तीं कुन्तलावलीम्।।५७।।

---

५८ °करच्छन्न°। (C, D, F); °करं छ°। (B, E);
५९ दन्तच्छदविराजितम्। (C, F);
६० °शु वि°। (B, D, E);
६१ °रं दर्शनात्परम्। (C, F);
६२ घोणादन्ता°। (C); घोणं द°। (D, E); घोणद°। (F); घ्राणं दन्ता। (B);
६३ °दंशन°। (B, D, E); °म्बादशन°। (F);
६४ °कुण्डल°। (A, B, C, D, E, F);
६५ °रूपिणी। (B, C, D, E, F);
६६ °म्भोजसं°।
६७ °तानिद°। (B, C, D);
६८ यशोसवि°। (F);
६९ °ल्लप°। (B, C, D, E, F);
७० °र्ध्वमायां च त... न्। (C); मायापुरं च तत्। (F);
७१ ङ्गासखीं च। (F);

अब्धितीरगते[७२] वाग्निज्वालाशङ्कां प्रपश्यताम्[७३]।
कुर्वत्स्वर्णकिरीटं[७४] सोऽस्मरन्मुरवैरिणः॥५८॥

तिष्ठन्तमन्तिके ताक्ष्यं शय्यारूपं च भोगिनम्।
प्राणनाथे च कंसारौ सोऽस्मद्भार्गवे[७५] धरे॥५९॥

इत्थं चिन्तयतो रूपं वैष्णवं सकलं गुरोः।
वक्त्रात्प्रादुरभूत्स्तोत्रं स्रग्धरावृत्तमाश्रितम्॥६०॥

निर्गलद्गुरुवक्त्रेन्दोर्मधुजित्स्तवनामृतम्[७६]।
कर्णाभ्यां सम्यगापीय सर्वाङ्गपुलकाञ्चिताः॥६१॥

तदाऽऽगता नभोमार्गं विमानस्था दिवौकसः।
यक्षकिंपुरषाद्याश्च सर्वे मुमुदिरे भृशम्॥६२॥

गायन्ति[७७] हि तन्वन्ति[७८] च नाद्यघोषं चं निर्भरम्।
कुर्वन्त्यानन्दनृत्तं च वृष्टिं दिव्यां[७८] च कौसुमीम्॥६३॥

देशिकेन्द्रो महायोगी स्तोत्रं कुर्वन्स वैष्णवम्।
विवेश[७९] परमानन्दं भानुबिम्बान्तरस्थितम्॥६४॥

कृतं[८०] गोविन्दनाथेन यतिभक्तिसहायतः।
इदं श्रीशङ्कराचार्यचरितं लोकपावनम्[८१]॥६५॥

---

७२ °गतौर्वा°। (B, C, D, E); °तौषा°। (F); °रागते। (A);
७३ प्रपद्यताम्। (F);
७४ कुर्वन्। (B, C, D);
७५ केशवे भार्गवीधरे। (C, F); °सोऽस्मरद्भार्गवी°। (B); कंसारेः (B, D, E);
७६ °त्रव°। (A, D, E);
७७ सन्तुष्टदिविवत्सङ्घे। (C); संदृष्टदि°। (F); सन्तुष्टे दि°। (B, D, E); 'A' omits these words;
७८ सम्प्राप्य कौ°। (C)
७९ विष्णोस्तु। (C);
८० Before this stanza, 'C' reads: स्वरूपमगमन्नित्यं पुनरावृत्तिवर्जितम्।
८१ 'C' & 'F' read the two halves of this stanza in the reverse order;



ज्ञानप्रदं नरैः सर्वैर्यतिभिस्तु[८२] विशेषतः।
स्मर्तव्यं पठितव्यं[८३] च श्रोतव्यं चाऽनुवासरम्॥६६॥

ये पठन्ति नरा वृत्तं शङ्कराचार्ययोगिनः।
ज्ञानं विद्यां च मोक्षं च ते प्राप्नुयुरसंशयम्॥६७॥

पुत्रार्थी पुत्रसंपत्तिं शिष्यार्थी शिष्यसंपदम्।
लभेत[८४] शङ्कराचार्यचरितं कीर्तयन्नरः॥६८॥

भिक्षुर्यश्च[८५] पठत्येतच्छृणोति च दिने दिने।
स ज्ञानी बहुलारोग्यो लभेत[८६] परमं पदम्॥६९॥

इत्युक्त्वा च यतिश्रेष्ठः शङ्कराचार्यसत्कथाम्।
श्रोतुकामाय शिष्याय भक्तियुक्ताय भक्तिमान्॥७०॥

अन्वहं[८७] पठितुं सर्वमाचार्यचरितं महत्[८८]॥
द्विषट्कं चाथ पद्यानां शिष्यायोपदिदेश सः[८७]॥७१॥

देशे कालडिनाम्नि केरलधराशोभाकरे सद्विजे[८९]
जातः श्रीपतिर्मन्दिरस्य सविधे सर्वज्ञतां प्राप्तवान्।
भूत्वा षोडशवत्सरे यतिवरो गत्वा बदर्याश्रमम्
कर्ता भाष्यनिबन्धनस्य सुकविः श्रीशङ्करः पातु नः॥७२॥१॥

---

८२ °भिक्षा। (C);
८३ पठितव्यं कीर्तितव्यं। (C, F);
८४ लभते। (B, C, D);
८५ भिक्षुको यः। (B, C, D, E, F);
८६ लभते। (B, C);
८७ 'E' does not give the second half of this stanza;
८८ शुभम्। (F);
८९ °जात्। (B, C);

सन्तोषाकुलमानसाय[९०] सुतरां तूर्णं बदर्याश्रमम्
सम्प्राप्ताय ततः पराशरभुवे भाष्यं निजं दर्शयन्।
सार्धं तेन तपोधनेन बहुधा कृत्वा च संभाषणम्
मात्रा संस्मृत आत्मजन्मनिलयः[९१] श्रीशङ्करः पातु नः॥७३॥२॥

मात्रे[९२] वेद्यतमं निवेद्य मरणे दग्ध्वाऽनले तां द्रुतम्[९३]
भूयोऽभ्येत्य[९४] मुनीन्द्रसेवनरतः श्रीमद्बदर्याश्रमम्।
प्रीत्या तत्र सुनन्दनं सुमहितं शिष्यं च संन्यासयन्।
तद्युक्तः कृतपुण्यतीर्थगमनः श्रीशङ्करः पातु नः॥७४॥३॥

मातुर्मुक्ति-पदप्रदाननिरतस्तीर्थं प्रयागाभिधम्[९५]
गत्वा तत्र यथावदेव विहितस्नानः स्मरन्मातरम्।
दृष्ट्वा भट्टगुरुं तुषानलगतं तत्तीरतो दर्शयन्
अस्मै भाष्यमनेन मानितमतिः[९६] श्रीशङ्करः पातु नः॥७५॥४॥

तस्मात् प्रस्थितवान् तदीयवचसा शिष्यत्वमानीतवान्
वादे भूयसि विश्वरूपगृहिणं गोकर्णयाने पुनः।
दृष्ट्वा कंचन वर्णिनं द्विजसुतं मुक्ताखिलाकाङ्क्षितम्[९७]
कृत्वा तं च यतीश्वरं प्रमुदितः श्रीशङ्करः पातु नः॥७६॥५॥

भूयस्तोटकनामधेयममलं शिष्यं च संन्यासयन्
सर्वैः शिष्यजनैरुदारमतिभिर्युक्तः क्षितौ संचरन्।
नानातीर्थनिषेवणोत्सुकमतिः श्रीकालहस्तीश्वरम्
दृष्ट्वा शङ्करमादरात्कृतनतिः[९८] श्रीशङ्करः पातु नः॥७७॥६॥

---

९० तुल°। (B, D);
९१ आप्त°। (B, C, D);
९२ °त्रेऽव°। (C);
९३ मृतां। (B, C, D);
९४ °प्येत्य। (C, D);
९५ °गाह्वयम्। (C, D); °गात्स्वयम्। (B);
९६ °तमः। (B, C, D);
९७ °खिलं कां°। (D);
९८ °नुतिः। (A, B, C);



श्रीकाञ्चीपुरमाप्तवानथ ततः श्रीपुण्डरीकाह्वयम्
क्षेत्रं पुण्यतमं समेत्य महितं पश्यन् विभोस्ताण्डवम्।
कावेरीसरितं ततस्तदनु[९९] तं श्रीरङ्गनाथं हरिम्
दृष्ट्वा राघवसेतुमेत्य मुदितः श्रीशङ्करः पातु नः॥७८॥७॥

स्नात्वाऽऽनम्य च रामनाथमथ तत्काञ्चीपुरं प्राप्तवान्
जित्वा तत्र सरस्वतीं भगवतीं सर्वज्ञपीठं मुदा।
आरुह्याऽथ वृषाद्रिनायकमितो[१००] युक्तः स्वशिष्यैस्ततः
सायुज्यं गतवान्[१०१] कृताच्युतनतिः श्रीशङ्करः पातु नः॥७९॥८॥

जातः केरलभूतले द्विजवरो[१०२] भूत्वाऽऽशु[१०३] भाष्याण्यतः
कृत्वा पञ्चदश[१०४] क्रमेण चतुरो लब्ध्वा च शिष्यान् वरान्।
श्रीकाञ्चीपुरमेत्य तत्र जितवान् वाणीं च सर्वज्ञताम्
गत्वा प्राप्तवृषाचलः[१०५] स्वपदगः श्रीशङ्करः पातु नः॥८०॥९॥

अस्मिन् जन्मनि वाऽन्यजन्मसु[१०६] मनोवाक्कर्मभिर्यत्कृतम्
बाल्ये वा सति यौवने च विहितं यद्यत्कृतं वार्धके।
अज्ञानादपि बुद्धिपूर्वमधुना[१०७] यत्संचितं चाऽनिशम्
तस्मात्कल्मषवृन्दतः[१०८] सकलतः श्रीशङ्करः पातु नः॥८१॥१०॥

---

९९ गतं तद°। (B, C, D);
१०० °कमथो। (C);
१०१ कृतवान्। (C);
१०२ यतिवरो। (B, C, D);
१०३ सुभा°। (C); भूत्वा च भाष्याण्यथ। (B, C, D);
१०४ °शास्त्रमेण। (B, C, D, F);
१०५ °चलोऽमृतगतः। (B, C, F); °चलो मृतिगतः। (D);
१०६ चा°न्य°। (B, C, D);
१०७ °मथवा। (B, C, D);
१०८ °न्दसैकतवजात्। (C);

यच्चाम्भोजपदाशनेन[१०९] विहितं यच्चाशुभाव्यागमात्[११०]
यच्चागम्यपदाभिवासजनिता[१११] यच्चानवेक्ष्येक्षणाः[११२]।
यच्चावाच्यनिरर्थकानृतवचः[११३]संभाषणादर्जितम्
तस्मात्कल्मषवृन्दतः[११४] सकलतः श्रीशङ्करः पातु नः॥८२॥११॥

श्रीमच्छङ्करदेशिकस्य चरितस्तोत्रं प्रबोधप्रदम्
निर्दिष्टाखिलपापवृन्दविपिनं[११५] संक्षिप्तमेतन्नराः।
ये शृण्वन्ति पठन्ति सादरयुताः[११६] संचिन्तयन्त्वन्वहम्
ते लब्ध्वा भुवि संपदं च सकलामन्ते सुखं[११७] निश्चितम्॥८३॥१२॥

**॥ इति श्रीशङ्कराचार्यचरिते नवमोऽध्यायः[११८] ॥**

१०९ यच्चाभोज्य°। (A, C, D, F);
११० °ध्वाटनात्। (B, C, D);
१११ °पदाधि° नितं। (B, C, D, F);
११२ °क्षणात्। (B, C, D, F);
११३ °वाप्य°। (D);
११४ °वृन्दसैकतव्रजात्। (C);
११५ निर्दग्धा°। (B, C, D, F);
११६ चादर°। (B, C, D);
११७ लभन्तेऽमृतम्। (B, C, D, F);
११८ After this, 'C' adds the words: आचार्यविलासः समाप्तः। 'D' adds : आचार्यस्वामिचरितं समाप्तम्।



श्रीशङ्करस्य जयतीह यतीश्वरस्य[११९]
त्रैलोक्यविश्रुतमिदं चरितं सुपुण्यम्।
पापं समस्तमपि संहरदेव नित्यम्
संशृण्वतां कथयतां स्मरतां च नृणाम्॥
विजयाब्दे वसन्तर्तौ चैत्रद्वीपाम्बिकाकृते।
पौर्णिमास्यां सोमवारे वेंकटेश्वरशास्त्रिणा॥
शङ्कराचार्यचरितं लिखितं पावनं महत्।
कृतं गोविन्दनाथेन यतिभक्तिसहायतः॥

**॥ इति श्रीशङ्कराचार्यार्पणमस्तु ॥**

११९ B, C, D, E, F do not contain these stanzas after the colophon 'F' gives two stanzas after the colophon as follows:
अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित्।
षोडशे कृतवान् भाष्यं च...॥
यदक्षरपरिभ्रष्टं मात्राहीनं तु यद्भवेत्।
तत्सर्वं क्षम्यतां देव नारायण नमोऽस्तु ते॥